CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पं. सोहनलाल शर्मा

जहांगीराबाद.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नाड़ीविज्ञानम्।

महामुनि कणादविरचितम्।

पण्डितकुलपतिना,
वि, ए, उपाधिधारिणा
श्रीजीवानन्दविद्यासागरभट्टाचार्य्येण
विरचितया व्याख्यया समलङ्कृतम्।

द्वितीयसंस्करणम्।

कलिकातानगरे
कलिकाता यन्त्रे
मुद्रितम्।

ई १८८७।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नाड़ीविज्ञानम् ।

महामुनि कणादविरचितम् ।

पण्डितकुलपतिना,

वि, ए, उपाधिधारिणा

श्रीजीवानन्दविद्यासागरभट्टाचार्य्येण

विरचितया व्याख्यया समलङ्कृतम् ।

द्वितीयसंस्करणम् ।

कलिकातानगरे

कलिकाता यन्त्रे

मुद्रितम् ।

इं १८९७ ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नाड़ीविज्ञानम् ।

यद्वक्त्रेभ्यः पञ्चसंख्या गतेभ्यो
वेदा जाता ऋग्यजुःसामरूपाः ।
सायुर्वेदाऽथर्ववेदश्च तस्मिन्
आस्तां शम्भौ श्रीकणादस्य भक्तिः ॥ १ ॥

टीकाकृतः मङ्गलाचरणम् ।

नत्वा वाणीं सरसिजवसां बिभ्रतीं शुभ्रकान्तिम्
जीवानन्दो द्विजकुलभवः श्रीयुतो मुग्धधीनाम् ।
सच्छात्राणां मतिविकशनात् नाड़िविज्ञाननाम्नः
सम्यग् यत्नात् रचयतितरां पुस्तकस्यास्य टीकाम् ।

इह खलु महामुनिः कणादः ग्रन्थस्य निर्विघ्नपरिसमाप्तये मङ्गलमाचरति। यदिति पञ्चसंख्यागतेभ्यः पञ्चपरिमितेभ्यः यद्‌वक्त्रेभ्यः यस्य वक्त्रेभ्यः आस्येभ्यः पञ्चमुखेभ्यः इत्यर्थः। वेदाः श्रुतयः जाताः बहिर्गताः भुवि प्रचारिताः। ते हि कतिविधाः ? कानि वा तेषां नामधेयानि ? इत्यत आह। ऋगिति। ऋक्‌च यजुश्च साम च इति ऋग्यजुःसामानि, तानि एव ऋग्वेदा यजुर्वेदा सामवेदाश्च। तथा आयुर्वेदेन सह वर्त्तमानः इति सायुर्वेदः, स चासौ अथर्ववेदश्च इति। सायुर्वेदाथर्ववेदः, अत्र सहशब्दस्य पृथक्‌साहित्यं बोध्यम्। पिता सह गतः पुत्रः इत्यादिवत्। एवं सति आयुर्वेदस्य अथर्ववेदान्तर्गतत्वं द्योतितम्। इति पञ्चधा वेदाः जाताः भुवि प्रचारिताः,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

आस्ते वेदः पञ्चमो वैद्यकाख्यो
वेत्ता कश्चित् तस्य नास्ते महेशात्।
तस्माद्धाताऽध्यैष्ट तस्मात् तुराषाट्
तस्माज्ज्ञात्वा वक्तुमर्हामि शास्त्रम् ॥ २ ॥

सार्द्धत्रिकोट्यो नाड्यो हि स्थूलाः सूक्ष्माश्च देहिनाम्।
नाभिकन्दनिबद्धास्तास्तिर्य्यगूर्द्ध्वमधःस्थिताः ॥३॥

तस्मिन् शम्भौ श्रीकण्ठादस्य भक्तिः पूज्येषु अनुरागः आस्तां तिष्ठतु; प्रार्थनायां लोट्। सत्यां च तस्मिन् भक्तौ मम उद्योगः सर्वथा सफलीभविष्यति इति भावः ॥ १ ॥

वैद्यकाख्यः वैद्यको नाम पञ्चमः वेदः आस्ते। किन्तु कश्चित् कोऽपि मानवः महेशात् शम्भोः तस्य वैद्यकाख्यस्य वेदस्य वेत्ता ज्ञाता नास्ते नास्ति इत्यर्थः। ननु कुतः आविर्भावः तस्य? इत्यत आह धाता ब्रह्मा तस्मात् महेशात् अध्यैष्ट पठितवान्। तमेव गुरुत्वेन निर्णीय तज्ज्ञानं लेभे इत्यर्थः। तुराषाट् इन्द्रः तस्मात् ब्रह्मणः अध्यैष्ट ब्रह्मैव इन्द्रस्य गुरुरित्यर्थः। अहन्तु तस्मात् तुराषाहः सकाशात् ज्ञात्वा विदित्वा शास्त्रम् इदं नाड़ीविज्ञानरूपं वैद्यकाख्यं वक्तुम् अर्हामि शक्नोमि इत्यर्थः ॥ २ ॥

सार्द्धेति। देहिनां प्राणिनां देहेषु स्थूलाः परिणतावयवाः सूक्ष्माः प्रतनवः सार्द्धत्रिकोट्यः अर्द्धकोट्या सह त्रिकोट्यः अत्र अभ्यासवृत्तौ बहुवचनम्। यत्तु विंशत्यादेरेकत्वं तदनभ्यासवृत्तौ इति बोध्यम्। नाड्यो हि सन्ति, इति शेषः। ता नाड्यो नाभिकन्दे नाभिमूले निबद्धा दृढ़मूला अथवा नाभौ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

द्वासप्ततिसहस्रन्तु तासां स्थूलाः प्रकीर्त्तिताः ।
देहे धमन्यो धन्यास्ताः पञ्चेन्द्रियगुणावहाः ॥ ४ ॥
तासाञ्च सूक्ष्मसुषिराणि शतानि सप्त,
स्युस्तानि यैरसकृदन्नरसं वहद्भिः ।
आप्याय्यते वपुरिदं हि नृणाममीषाम्
अम्भः स्रवद्भिरिव सिन्धुशतैः समुद्रः ॥ ५ ॥

कन्दं मूलं निबद्धं यासां, तास्तिर्य्यग्भावेन ऊर्द्ध्वभावेन अधोभावेन च स्थिता विन्यस्ताः ॥ ३ ॥

द्वासप्ततीति । तासां सार्द्धत्रिकोटीनां नाड़ीनां मध्ये द्वासप्ततिसहस्रं द्वासप्ततिसहस्रसंख्यका नाड्यः स्थूला इति महत्तराः परिणतावयवा धमन्य इति कथिता उक्ताः । ता-धमन्यः पञ्चेन्द्रियाणां चक्षुःकर्णनासिकाजिह्वात्वचां ये गुणा रूपशब्दगन्धरसस्पर्शास्तान् आवहन्तीति आवहास्ता धन्याः प्रधानाः । यदुक्तं सुश्रुतेन शारीरस्थाने तासान्तु नाभिप्रभवाणां धमनीनामूर्द्ध्वगा दश, दश चाधोगामिन्यश्चतस्रस्तिर्य्यग्गाः । ऊर्द्ध्वगाः शब्दस्पर्शरूपरसगन्धप्रश्वासोच्छ्वासजृम्भितक्षुधितहसितकथितरुदितादीन् विशेषानभिवहन्त्यः शरीरं धारयन्ति । तास्तु हृदयमभिप्रपन्नास्त्रिधा जायन्ते तास्त्रिंशत् । तासान्तु वातपित्तकफशोणितरसान् द्वे द्वे वहतस्ता दश । शब्दरूपरसगन्धानष्टाभि र्गृह्णीते । द्वाभ्यां भाषते च, द्वाभ्यां घोषं करोति, द्वाभ्यां स्वपिति, द्वाभ्यां प्रतिबुध्यते । द्वे चाश्रुवाहिन्यौ, द्वे स्तन्यं स्त्रिया वहतः स्तनसंश्रिते । ते एव शुक्रं नरस्य स्तनाभ्यामभिवहतः एवं त्रिंशदिति ॥ ४ ॥

तासामिति । तासां द्वासप्ततिसहस्राणां नाड़ीनां मध्ये

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

आपादतः प्रभृति गात्रमशेषमेषा-
मामस्तकादपि च नाभिपुरःस्थितेन।
एतन्मृदङ्ग इव चर्मचयेन नद्धम्
कायं नृणामिह शिराशतसप्तकेन ॥ ६ ॥

शतसप्तानां मध्ये
चतुरधिकाविंशतिः स्फुटास्तासाम्।
एका परीक्षणीया या
दक्षिणकरचरणविन्यस्ता ॥ ७ ॥

सप्तशतानि सूक्ष्मशुषिराणि तनुच्छिद्राणि स्युर्भवेयुः, असक्तत् निरन्तरम् अन्नरसं भुक्तद्रव्यरसं वहद्भिर्यैः शुषिरैरमीषां नृणाम् इदं वपुः शरीरम् अम्भः स्रवद्भिर्जलं क्षरद्भिः सिन्धुशतैः सिन्धूनां शतैः यद्वा सिन्धवश्च सिन्धवश्च इति एकशेषे सिन्धवः नदाः नद्यश्च तच्छतैः समुद्र इव आप्याय्यते प्रपूर्य्यते ॥ ५ ॥

आपादत इति। इह पृथिव्याम् एषां नृणां आपादतः आङ्मर्य्यादावचने इति पञ्चम्यास्तसिल्। आचरणात् प्रभृति आमस्तकात् मस्तकपर्य्यन्तम् अशेषगात्रं सर्वशरीरं व्याप्य शिराशतसप्तकेन शिरासप्तशतकेन सप्तशतनाड्या इत्यर्थः। एतत् कायं देहं चर्मचयेन चर्म्मणां चयस्तेन चर्मसमूहेन चर्मरज्ज्वा इत्यर्थः, मृदङ्ग इव नद्धं बद्धम् ॥ ६ ॥

शतसप्तानामिति। तासां शतसप्तानां नाड़ीनां मध्ये चतुर्विंशतिः नाड्यः स्फुटा व्यक्तास्तिष्ठन्ति। तासां चतुरधिकविंशतीनां मध्ये या एका सा एव नाड़ी परीक्षणीया। सा किम्भूता? दक्षिणकरचरणविन्यस्ता, दक्षिणकरादारभ्य दक्षिणचरणं व्याप्य विन्यस्ता इति बोद्धव्या। प्राधान्यात्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तिर्य्यक्कूर्मो देहिनां नाभिदेशे,
वामे वक्त्रं तस्य पुच्छञ्च याम्ये।
ऊर्द्ध्वे भागे हस्तपादौ च वामौ,
तस्याधस्तात् संस्थितौ दक्षिणौ तौ॥ ८॥

वक्त्रे नाड़ीद्वयं तस्य पुच्छे नाड़ीद्वयं तथा।
पञ्च पञ्च करे पादे वामदक्षिणभागयोः॥ ६॥

दक्षिणशब्दोऽत्र पुरुषस्य इत्यर्थात् स्त्रियास्तु वामकरोपचारा-दिति शेषः। चतुरधिकेति प्रस्तुतत्वात् तदुक्तम्।
तदुक्तम् वामभागे स्त्रिया योज्या नाड़ी पुंसस्तु दक्षिणे।
इति प्रोक्ता मया देवि! सर्वदेहेषु देहिनाम्॥

अस्यार्थः। स्त्रिया वामभागे पुंसस्तु दक्षिणभागे नपुंस-कस्य तु स्त्रीपुंसयोरन्यतमाकारप्रकारमपेक्ष्य साम्ये किं स्यात्? साम्यन्तु न स्यात् कृत्रिमस्य प्रकृतिस्थितेति विशेषः। कूर्माव-स्थितिभेदेनैव स्त्रीपुंसयोर्वामदक्षिणतः परीक्षा॥ ७॥

देहिनां प्राणिनां नाभिदेशे नाभिस्थले तिर्य्यक् वक्रभावेन कूर्मः कच्छपस्तद्वदवयवविशिष्टः नाड़ीचक्र इति अस्ति, तस्य कूर्मावयवविशिष्टस्य वामे वामपार्श्वे वक्त्रं मुखं, याम्ये दक्षिण-पार्श्वे पुच्छं लाङ्गूलमिति ऊर्द्ध्वे भागे वामौ हस्तपादौ, तस्य कूर्मस्य अधस्तात् निम्नभागे दक्षिणौ हस्तपादौ स्याताम्॥८॥

करे यत् पञ्चोपादानं तत् सम्यक् प्रमाणानुरोधात् एका चरिता अर्थत्वात्। एकेति एकस्या एव पाणिपादमध्यविन्या-सात् दक्षिणेति प्राधान्येन पुरुषाश्रयत्वम्।

वक्त्र इति। तस्य कूर्मस्य वक्त्रे मुखे नाड़ीद्वयं तथा पुच्छे लाङ्गूले च नाड़ीद्वयं वामदक्षिणभागयोः करे हस्ते, पादे चरणे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वातं पित्तं कफं द्वन्द्वं सन्निपातं रसं त्वसृक्।
साध्यासाध्यविवेकञ्च सर्वं नाड़ी प्रकाशयेत् ॥१०॥
सव्येन रोगधृतिकूर्परभागभाजा,
पीड्याथ दक्षिणकराङ्गुलिकात्रयेण।
अङ्गुष्ठमूलमधिपश्चिमभागमध्ये,
नाड़ीं प्रभञ्जनगतिं सततं परीक्षेत् ॥११॥

च, वामे करे दक्षिणे करे पादे चेत्यर्थः। पञ्च पञ्च नाड्यः सन्ति ॥ ९ ॥

वातमिति। पृथक् शब्दं द्वन्द्वसन्निपातान् रसं रसधातुम् असृक् रक्तं, तुशब्दात् मांसादिधातुर्विज्ञेयः, रसादिसप्त बोधयति। चकारेण एतत्कृतविकाराणामेषाञ्च साध्यासाध्यविवेकं सर्वं नाड़ी प्रकाशयेत्। सन्निपातं त्रिदोषजमिति सामान्यतः। साध्यासाध्यमिति विशेषतश्च इत्यर्थः। सर्वमित्येतदन्यच्च रोगादिकम् इत्युपसंहारः। पृथक् वातं पित्तं कफं द्वन्द्वं त्रिदोषं रसं रसधातुं रक्तं, तुशब्दात् रसरक्तभिन्नं मांसमेदोऽस्थिमज्जप्रभृतिपञ्चधातवो बोद्धव्याः। नाड़ी एवं सर्वं प्रकाशयेत् प्रबोधयेत् ॥ १० ॥

परीक्षणीयमाह सव्येनेति। सव्येन वामकरेण किम्भूतेन रोगधृतिकूर्परभाजा, रोगधृतिर्गदधारणं स्थानं, कूर्परः कफोणिदेशः, रोगाणां वातादिपिशुनानां विज्ञातकृतगतिमतां धृतिर्धारणं यत्र कूर्परे स रोगधृतिकूर्परस्तस्य भागः, समुदितकफोणिस्तथा भजते इति रोगधृतिकूर्परभागभाक्, तेन रोगधृतिकूर्परभागभाजेति। परीक्षाकालेऽपि तत्रैव हस्तस्थितये दक्षिणकराङ्गुलित्रयेण आपीड्य अर्थात् नाड़ीम्। एत-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

परीक्षाकालमाह ।

प्रातः कृतसमाचारः कृताचारपरिग्रहम् ।
सुखासीनः सुखासीनं परीक्षार्थमुपाचरेत् ॥१२॥

त्त्वापीड़नं पौर्वापर्य्यबोधार्थम् । अथेत्यापीड़नान्तरं परीक्षा न तु परीक्षाकालेऽपि आपीड़नस्थितिः । दक्षिणेति प्रायिकं स्वपरीक्षायां अन्यथादर्शनात् त्रयेणेति योग्यतया तर्जनी-मध्यमानासिकानां ग्रहणम् । पश्चिमेति अङ्गुष्ठस्याधोभागः । मूलेति क्षुद्रग्रन्थिप्रान्तभागमारभ्य मध्य इति अङ्गुलिद्वयपरि-मितमूले । तदुक्तं "अङ्गुष्ठस्य तु मूले या सा नाड़ी जीव-साक्षिणीति । तस्या गतिवशात् विद्यात् सुखं दुःखञ्च देहि-नाम्" । प्रभञ्जनगतिं प्रभञ्जनस्य वायोर्गतिर्यत्र एतेनैवं बोधयति । पित्तश्लेष्मणो गतेरभावः । "पित्तं पङ्गु कफः पङ्गुः पङ्गवो मलधातवः" इति, वातप्रेरिता या गतिर्नान्यार्थेत्यर्थः । सततमिति सुस्थदशायामपि ।

सव्येनेति । रोगिणां रोगाणां छतिर्धारणं यत्र स एव कूर्परः भुजमध्यग्रन्थिः, तस्य भागं स्थानं भजति यत् तेन सव्येन नाड़ीपरीक्षकस्य वामकरेण आपीड्य नाड़ीं मर्दयित्वा अथ अनन्तरं दक्षिणकराङ्गुलिकात्रयेण नाड़ीपरीक्षकस्य दक्षिण-हस्ताङ्गुलिकात्रयेण तर्जनीमध्यमानामिकाङ्गुलिभिरित्यर्थः । अङ्गुष्ठमूलमधिपश्चिमभागमध्ये अङ्गुष्ठमूलमणिबन्धयोर्मध्य-स्थले सततं निरन्तरं वातादिपरीक्षार्थं प्रभञ्जनगतिं प्रभञ्जनः वातः स एव गतिर्यस्याः तां नाड़ीं परीक्षेत् । देहमध्ये मल-धातवो ये सन्ति ते सर्वे अचला वायुना चलन्ति ॥ ११ ॥

प्रातरिति । समाचारः सम्यगाचरिताचारः वैद्य इति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तैलाभ्यङ्गे च सुप्ते च तथा च भोजनान्तरे ।
तथा न ज्ञायते नाड़ी यथा दुर्गतमा नदी ॥१३॥
अङ्गुष्ठस्य तु मूले या सा नाड़ी जीवसाक्षिणी ।
तस्या गतिवशात् विद्यात् सुखं दुःखञ्च रोगिणाम् ॥१४॥

यावत् कृतः प्रातःकालीनमलादित्यागविधिरित्यर्थः । कृताचारपरिग्रहं रोगिणं सुखासीनः सुखोपविष्ट इत्यर्थः । सुखासीनं एवं प्रातरिति प्रशस्तः कालः । "मध्याह्नेऽप्युष्णतान्विता सायाह्ने धावमाना च" इति वचनात् व्यक्तमन्यत् ।

प्रातरिति । प्रातः प्रातःकाले कृतसमाचारः कृतः सम्यक् समाचारः सम्यक्प्रकारेण मलमूत्रादित्यागपूर्वकं मुखप्रक्षालनादिकार्य्यं येन तथोक्तः सुखासीनः परीक्षार्थिनः समीपे सुखोपविष्टः भिषक्कृताचारपरिग्रहं कृतः सम्पन्नः आचारपरिग्रहः प्रातःकृत्यादिकार्य्यं येन तथोक्तं सुखासीनं सुखोपविष्टं नाड़ीपरीक्षार्थिनं परीक्षार्थं वातपित्तकफानां न्यूनाधिकविवेचनार्थम् उपाचरेत् संस्पृशेत् । मध्याह्ने उष्णतया सायाह्ने धावमानया इत्याशङ्कायां नाड़ीपरीक्षाकालः प्रातरेव प्रशस्तः ॥ १२ ॥

तैलेति । स्नेहमात्रोपलक्षणम् । सुप्त इति निद्राकाले भोजनान्तरे, भोजनमध्ये भोजनावसानमात्रे च ।

तैलाभ्यङ्ग इति । तैलाभ्यङ्गे घृततैलवसादिमर्दने, सुप्ते निद्राकाले तथा भोजनान्तरे भोजनमध्यसमये चकारात् भोजनावसाने दुर्गतमा नदीव नाड़ी न ज्ञायते न अनुभूयते ॥ १३ ॥

अङ्गुष्ठस्येति । अङ्गुष्ठं वृद्धासंज्ञितं तन्मूले तर्जनीनिवेशस्थाने या नाड़ी सा जीवसाक्षिणी जीवज्ञापनी, जीवस्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्नायुनाड़ी वसा हिंस्रा धमनी धामनी धरा ।
तन्तुकी जीवितज्ञा च शिरा पर्य्यायवाचिकाः ॥१५
आदौ च वहते वातो मध्ये पित्तं तथैव च ।
अन्ते च वहते श्लेष्मा नाड़िकात्रयलक्षणम् ॥१६॥
वाताधिका वहेत् मध्ये त्वग्रे वहति पित्तला ।
अन्ते च वहते श्लेष्मा मिश्रिते मिश्रलक्षणा ॥१७॥

प्राणस्य साक्षिस्वरूपा प्रत्ययकारिणीति। रोगिणामित्युपलक्षणं सुस्थानामपि ॥ १४ ॥

स्नायुरित्यादि। दश नामानि स्पष्टार्थम् ॥ १५ ॥

आदाविति। आदौ कफोणिपीड़नं द्वितीयचरणे चकारस्यार्थः। न तु तर्जनीनिवेशस्थाने अर्थवशात्। मध्यमनिवेशस्थानमेव तत्र युक्तिमाह। मध्यमाङ्गुलभागस्य समत्वात् दैर्घ्याच्चादौ स्पर्शः, असमत्वाच्च तदनु तर्जन्या अन्ते अनामिकया इति गुरवः।

आदौ मध्ये अन्ते च यदुक्तं तद्दोषाणां वायुपित्तकफानां कालनिरूपणं ज्ञेयम्। उक्तं हि सुश्रुते सूत्रस्थाने एकविंशतितमेऽध्याये "स (वातः) शीताभ्रप्रवातेषु घर्मान्ते च विशेषतः। प्रत्यूषस्य पराह्णे तु जीर्णेऽन्ने च प्रकुप्यति।" तत् (पित्तं) उष्णैरुष्णकाले च मेघान्ते च विशेषतः। मध्याह्ने चार्द्धरात्रे च जीर्य्यत्यन्ने च कुप्यति।" स (श्लेष्मा) शीतैः शीतकाले च वसन्ते च विशेषतः। पूर्वाह्णे च प्रदोषे च भुक्तमात्रे प्रकुप्यति॥ १६ ॥

वाताधिकेति। वाताधिका वातोल्वणा नाड़ीति मध्ये तर्जन्यनामिकयो र्मध्ये वहतीत्यर्थः। अग्रे अङ्गुष्ठमूलेति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

आदौ च वहते पित्तं मध्ये श्लेष्मा तथैव च ।
अन्ते प्रभञ्जनो ज्ञेयः सर्वशास्त्रविशारदैः ॥१८॥
भूलता भुजगप्राया स्वच्छा स्वास्थ्यमयी शिरा ।
सुखितस्य स्थिरा ज्ञेया तथा बलवती मता ॥१९॥

पित्तला पित्तोल्बणा, अन्ते अनामिकायाः कफोल्बणा इत्यन्वयः । स्पष्टमन्यत् ॥ १७ ॥

आदाविति । पित्तमादौ वहति मध्ये श्लेष्मा अन्ते प्रभञ्जनो ज्ञेय इति एतद्वचनममूलकं पित्तस्य मध्ये सर्वैर्लिखितत्वात् कफस्य मध्ये चालङ्घतत्वात् च सुस्थस्यानुभावाच्च । असाध्यतायामपि पूर्वं पित्तगतिं प्रभञ्जनगतिं श्लेष्मणामाविभ्रतीमित्याद्याद्युक्तेश्च समूलत्वे दोषानिष्टपरमिति शङ्करसेनोक्तम् । अत्र क्वचित् कश्चिदेवं व्याचकार । यदा विकृतिविषमसमवेतवातप्रेरितौ पित्तश्लेष्माणौ स्वाश्रयपरित्यागिनौ भवतस्तदा स्वस्थानं परिहृत्य गतिं कुरुत इति । दोषाविष्टमेवोक्तम् । अत्र दोषशब्दो वायुमाहेति शङ्करसेनाभिप्रायः । आदौ तर्जनीनिवेशस्थले मध्ये कफोणिपीड़नमपेक्ष्य अर्थात् अनामिकानिवेशस्थले अन्ते उपबिष्टा अर्थात् मध्यमानिवेशस्थले यथाक्रमम् पित्तकफवाता वहन्ति । शङ्करसेनेनोक्तम् । यथा "अन्ते प्रभञ्जनो ज्ञेयः सर्वशास्त्रविशारदैः" इति तदमूलं पित्तस्य सर्वत्रैव मध्यत्वेनाभिहितत्वात्, स्वस्थस्य तथा अनुभवाच्च । असाध्यतायां पूर्वं पित्तगतिरित्यस्य लिखितत्वाच्च समूलत्वेऽपि असाध्यतादोषविशेषपरं पित्तकालपरं वा यदा यं धातुमाप्नोति इत्याद्युक्तेरिति केचित् ॥ १८ ॥

सुस्थज्ञानमाह भूलतेत्यादि । प्रायेति अनयो र्गमनतुल्या स्वच्छा परितो जाड्यरहिता । स्वास्थ्यमयीति स्वास्थ्यव्यञ्जिका ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रातः स्निग्धमयी नाड़ी मध्याह्नेऽप्युष्णतान्विता।
सायाह्ने धावमाना च चिराद्रोगविवर्जिता ॥२०॥

पैत्त्यादिस्थितायास्त्व क्रमेण वातादे गतिमाह।

वातात् वक्रगता नाड़ी चपला पित्तवाहिनी।
स्थिरा श्लेष्मवती ज्ञेया मिश्रिते मिश्रिता भवेत्॥२१

भूलता किञ्चुलकः। भुजगः सर्पस्तयो र्गमनप्रायेति। भूलतेव मसृणवक्रगमना सर्पवत् परिपुष्टा इत्यर्थः। सुखितस्येति स्थिरा मन्दगमना, बलवती स्थौल्ये सति जाड्यरहिता ॥१९॥

प्रातरिति चिरादिति। अतीतानागतयोर्ग्रहणम्, एतत्तु वातादीनां व्याख्यानं स्थानविशेषस्य यदुक्तं एतत्तु सर्वसम्मतं गतिविशेषस्य सर्वसम्मतत्वात्। अतः शङ्करसेनेन व्याख्यातं स्थानविशेषस्य कृताप्यवक्ष्यमाणत्वादिति यथा चिरादिति अतीतानागतयोर्द्वयोरप्युक्तिः। अवान्तरभेदस्तु स्वल्पकालबहुकालव्यापकगतिभेदात्। एतच्च पथ्याशितानामेव ॥

चिराद्रोगविवर्जिता यस्य बहुदिनं रोगो नाभूत् वा अधिकदिनमध्ये रोगो न भविष्यति तस्य नाड़ी प्रातःकाले स्निग्धमयी, मध्याह्ने उष्णतान्विता उष्णतायुक्ता सायाह्ने अपराह्णे धावमाना चञ्चलेत्यर्थः॥ २०॥

वातादिति। वक्रेति वायोस्तिर्य्यग्गमनात् तिरोवहन्तीति, चपलेति वह्नेरूर्द्ध्वज्वलनात् ऊर्द्ध्वचञ्चला स्थिरेति जलस्य नीचगमनात् अनुल्वणा, मिश्रिते मिश्रचिह्ना भवति। तेन द्विदोषजे उभयचिह्ना, त्रिदोषजे सर्वलिङ्गेति। चपलतास्थिरतयोः समयभेदेनाविरोधः॥ २१॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सर्पजलौकादिगतिं वदन्ति विबुधाः प्रभञ्जनेन नाड़ीम् ।
पित्तेन काकलावकभेकादिगतिं विदुः सुधियः ।
राजहंसमयूराणां पारावतकपोतयोः ।
कुक्कुटस्य गतिं धत्ते धमनी कफसंवृता ॥ २२ ॥
मुहुः सर्पगतिं नाड़ीं मुहुर्भेकगतिं तथा ।
वातपित्तद्वयोद्भूतां तां वदन्ति मनीषिणः ॥२३॥
भुजगादिगतिं नाड़ीं राजहंसगतिं तथा ।
वातश्लेष्मसमुद्भूतां भाषन्ते तद्विदो जनाः ॥२४॥

सपजलौकादीति । आदिशब्दात् वातेन वृश्चिकगतिर्दोलायितगतिः, पित्तेन काकगतिः, प्लुतगतिः कुलिङ्गकलविङ्कादिगतिः, कफे राजहंसगजवरवराङ्गनादिगतिरित्यर्थः ॥

विबुधाः पण्डिताः प्रभञ्जनेन कुपितवातेन सर्पजलौकादिगतिं वदन्ति कथयन्ति । पित्तेन कुपितपित्तेन काकादिगतिं सुधियः पण्डिताः विदुः ज्ञातवन्तः । कफसंवृता कुपितकफयुक्ता धमनी नाड़ी राजहंसादीनां तथा पारावतकपोतयोः कुक्कुटस्य च गतिं धत्ते ॥ २२ ॥

मुहुरिति । सर्पगतिं चक्रगतिं भेकगतिं प्लुतगतिं, मुहुर्वारंवारम् एवम्भूतां तां नाड़ीं मनीषिणः पण्डिता वातपित्तोद्भवां वदन्ति कथयन्ति ॥ २३ ॥

भुजगादिगादीति । भुजगादिगतिः संस्थानं यस्यास्तां तथा राजहंसगतिं नाड़ीं तद्विदो जना नाड़ीज्ञपण्डिता वातश्लेष्मसमुद्भूतां भाषन्ते कथयन्ति ॥ २४ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मण्डूकादिगतिं नाड़ीं मयूरादिगतिं धराम्।
पित्तश्लेष्मसमुद्भूतां प्रवदन्ति विचक्षणाः ॥ २५ ॥

अन्यच्च।

सूक्ष्मा शीता स्थिरा नाड़ी पित्तश्लेष्मसमुद्भवा।
कफवातोद्भवा नाड़ी सर्पहंसगतिर्भवेत् ॥ २६ ॥
उरगादिलावकादिहंसादीनाञ्च विभ्रती गमनम्।

आदिना वातादेरन्यकर्मणामुक्तानामपि ग्रहणम्, एवञ्च पौर्वापर्य्यव्यतिक्रमेणापि कृच्छ्रसाध्यादित्वम्।

विचक्षणाः पण्डिता मण्डूकादिगतिं पित्तश्लेष्मसमुद्भूतां धरां नाड़ीं प्रवदन्ति कथयन्ति। आदिशब्देन वातस्य पित्तस्य कफस्य च पूर्वोक्तानां गतीनां अन्या वृश्चिकादीनां गतिर्ग्राह्या। पौर्वापर्य्यव्यतिक्रमेणेति "आदौ च वहते वातो मध्ये पित्तं तथैव च। अन्ते च वहते श्लेष्मा नाड़िकात्रयलक्षणम्" इति लक्षणेन यदा नाड़ी वहते तदा सुखसाध्यत्वं ज्ञेयं तद्व्यति-क्रमेण कृच्छ्रसाध्यत्वमसाध्यत्वञ्च ज्ञेयमित्यर्थः ॥ २५ ॥

सूक्ष्मेति। अणुतरसूक्ष्मता न तु पित्तधर्मः। तथाप्यत्र विकृतिविषमसमवायावस्थत्वात्। कस्यचित् संयोगादिविशे-षस्य विचित्रं कार्य्यं भवति, यथा हरिद्राचूर्णयोर्लौहित्यमिति, अथवा पित्तश्लेष्मणो र्द्रवत्वात् सूक्ष्मत्वं, अथवा सूक्ष्मत्वञ्चात्र पित्तश्लेष्मणोः संयोगः स्वभावादिति गुरवः। सूक्ष्मत्वेऽपि चाञ्चल्योपलब्ध इति। कृशतापि कफधर्मः, शीतताऽस्थिरत्वे कफस्य कार्य्यं किन्त्वान्तरीयकचाञ्चल्यम् अत्र सूक्ष्मता च पित्त-धर्मः ॥ २६ ॥

उरगादीति। उरगः सर्पः, आदिशब्देन जलौकावृश्चिकयो-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वातादीनाञ्च समं धमनी सम्बन्धमाधत्ते॥ २७॥
लावतित्तिरिवार्त्ताकगमनं सन्निपाततः।
कदाचिन्मन्दगा नाड़ी कदाचिच्छीघ्रगा भवेत्।
त्रिदोषप्रभवे रोगे विज्ञेया सा भिषग्वरैः॥२८॥

सन्निपातासाध्यलक्षणमाह।

मन्दं मन्दं शिथिलशिथिलं व्याकुलं व्याकुलं वा,

ग्रहणम् एतेन वातस्य, लावः पक्षिविशेषः, लत् प्रभृतीनां गतिग्रहणं पित्तस्यैतत्। हंसादीनाम् आदिशब्दात् कपोतगजवरवराङ्गनापारावतप्रभृतीनां ग्रहणं एतेन कफस्य। दोषत्रयाणां वातादीनां समं सम्बन्धम् अन्यूनातिरिक्तं यदा धमनी आधत्ते इत्यतः सन्निपातकत्वं नाड्याः सूचितम्।

उरगादीनां लावकादीनां हंसादीनां गमनं गतिं बिभ्रती धारयन्ती धमनी नाड़ी वातादीनां वातपित्तकफानां समं तुल्यं नतु न्यूनातिरिक्तं सम्बन्धं क्रमम् आधत्ते, सन्निपाते धमनी आदौ उरगादिवत् मध्ये लावकादिवत् अन्ते हंसादिवत् चलति तदा असाध्यत्वं न ज्ञेयम्। पित्तक्रमतयेति आदौ पित्तगतिः, मध्ये वायुगतिः, अन्ते श्लेष्मगतिरिति विपरीतक्रमेण वहते तर्हि कृच्छ्रसाध्यत्वम् असाध्यत्वञ्च ज्ञेयम्॥ २७॥

लावेति। सन्निपाततः त्रिदोषजे नाड़ी लावादीनां गमनं धत्ते, सा नाड़ी कदाचिन्मन्दगा मृदुताभावेन गच्छति, कदाचित् क्षणकालान्तरं शीघ्रगा द्रुतगामिनी भवेत्, त्रिदोषप्रभवे सन्निपाते एवम्भूता नाड़ी भिषग्वरैः चिकित्सकप्रवरैः ज्ञेया॥ २८॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्थित्वा स्थित्वा वहति धमनी याति नाशञ्च सूक्ष्मा।
नित्यं स्थानात् स्खलति पुनरप्यङ्गुलीं संस्पृशेद्वा,
भावैरेवं बहुविधविधैः सन्निपातादसाध्या ॥२८॥

अन्यच्च।

अत्युच्चका स्थिरात्यन्ता या चेयं मांसवाहिनी।

मन्दमिति। मन्दं मन्दमनुत्कटं शिथिलशिथिलमिति स्खलन्नतिरूपम्। व्याकुलं व्याकुलमिति चस्तवदितस्ततो गमनम्। वाशब्दः समुच्चये, स्थित्वा स्थित्वेत्यावृत्त्या च तत्तद्रूपैव गतिः नाशमदर्शनं याति गच्छति, कदाचिन्नाड़ी स्पन्दापि न सम्भाव्यत इत्यर्थः। सूक्ष्मेति यदि लभ्यते तदा तथैव, नित्यं प्रायः स्थानादिति स्थानमङ्गुष्ठमूलं, तस्मात् स्खलति कदाचित् तत्र स्पन्दापि न संलभ्यते इत्यर्थः। पुनरपीति कियद्विलम्बे अङ्गुलीम् अङ्गुलीमूलं संस्पृशेत् अकस्मात् स्फुरेत्। एवं इत्येवंरूपै र्बहुविधविधै र्भावै र्धर्मैः सन्निपाते नाड़ी असाध्या ज्ञातव्या।

मन्दमिति। सन्निपातात् धमनी नाड़ी मन्दं मन्दं मुहुर्मुहुरप्रखरं शिथिलं शिथिलं यथा स्यात्तथा स्थित्वा स्थित्वा वहति चलति वा सूक्ष्मा सती नाशं याति गच्छति, स्थानात् स्वस्थानात् नित्यं सततं स्खलति चलतीत्यर्थः। पुनरपि अङ्गुलीं संस्पृशेत् अङ्गुल्या अनुभूयत इत्यर्थः। एवं बहुविधविधैर्नानाप्रकारकारणैर्भावै र्धर्मैः सन्निपातादसाध्या धमनी अननुभवेत्यर्थः ॥ २८ ॥

अत्युच्चकेति। अत्युच्चका सहजतोऽप्युच्चतरा पृथगिवोन्नता। अत्यन्ताधिका स्थिरा कदाचित् प्रणिधानेनैव गम्यमानस्पन्दा च,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

या च सूक्ष्मा च वक्रा च तामसाध्यां विनिर्दिशेत्
॥ ३० ॥

अन्यच्च ।

महातापेऽपि शीतत्वं शीतत्वे तापिता शिरा ।
नानाविधगति र्यस्य तस्य मृत्यु र्न संशयः ॥ ३१ ॥

अन्यच्च ।

त्रिदोषे स्पन्दते नाड़ी मृत्युकालेऽपि निश्चला ।
ज्ञेया सर्वविकारेषु वैद्यैः कुशलकर्मभिः ॥ ३२ ॥

मांसवाहिनी मांसाहारा इव गतिमती। लगुड़प्राया मांसेन समं वहतीति न युक्तं, तद्रूपपरिचायकप्रकारस्यानुक्तत्वात्, इयमिति वैशिष्ट्यबोधनाय। या च सूक्ष्मा च वक्रा चेति पृथगेव वाक्यान्तरम् इति ।

मांसाहारे नाड़ीगतिः यादृशी भवति 'तादृशी नाड़ी मृत्युसूचका स्वभावतोऽत्युच्चतरा या नाड़ी सूक्ष्मा वक्रा च तां नाड़ीम् असाध्यां विनिर्दिशेत् जानीयात् ॥ ३० ॥

महेति। आशयाकृष्टपित्तादिकृततापनिरासः। शीतत्वमित्यत्रापि महेति सम्बध्यते ।

महातापे शरीरस्यातिशयोत्तापे शीतत्वं शरीरस्य शीतलत्वं शीतत्वे शरीरस्य अतिशयशीतलत्वे शिरा नाड़ी यदि तापिता उष्णा यस्य देहिनः शिरा नानाविधगति र्वातपित्तकफद्वन्द्वसन्निपातानां गति र्भवति तस्य मृत्युः न संशयः, निश्चयेन मृत्यु र्भवति ॥ ३१ ॥

निश्चला स्पन्दसामान्याभाववती। अतीसारादौ तु हस्तपदादिखेदादिना स्पन्दोपलम्भात्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अन्यच्च।

पूर्वं पित्तगतिं प्रभञ्जनगतिं श्लेष्माणमाविभ्रतीम्,
सन्तानभ्रमणं मुहुर्विदधतीं चक्राधिरूढामिव।
तीव्रत्वं दधतीं कलापिगतिकां सूक्ष्मत्वमातन्वतीम्
नो साध्यां धमनीं वदन्ति मुनयो नाड़ीगति-
ज्ञानिनः॥ ३३॥

भूलताभुजगाकारा नाड़ी देहस्य सङ्क्रमात्।

त्रिदोषे इति। त्रिदोषे सन्निपाते तथा मृत्युकालेऽपि नाड़ी निश्चला स्पन्दनाभाववत्यपि स्पन्दते स्फुरति॥ ३२॥

पूर्वमिति। प्रथमं पूर्वं क्रमविपर्य्यये पित्तादिगतिमतीं मुहुरिति वारंवारं एवं क्रमेण सन्तानभ्रमणं सन्तानेन विस्तारेण एतेन स्थानत्रयं व्याप्य गतिं कुर्वतीं चक्रादिरूढामिति चक्रोपरि भ्राम्यमाणामिव स्थानत्रयमिति शेषः। तीव्रत्वमिति तीव्रमतिशयवेगं, कलापिगतिकामिति कलापी मयूरस्तद्वद्गमनम्। यथा मयूरगतिरुत्तरोत्तरं कार्य्यं तथा क्षशतामासादयन्तीम् एवम्भूतां नाड़ीं नो साध्यां नाड़ीज्ञा वदन्तीति शेषः। अतएव नोशब्दो निषेधवाचकः, यथा अमा नो ना प्रतिषेधवाचका इति।

पूर्वमिति। नाड़ीगतिज्ञानिनो मुनयः पूर्वं प्रथमं पित्तगतिं तदनन्तरं प्रभञ्जनगतिं वायुगतिं ततः श्लेष्माणम् आविभ्रतीं मुहुश्चक्राधिरूढामिव सन्तानभ्रमणं विदधतीं तीव्रत्वं दधतीं कलापिगतिकां सूक्ष्मत्वम् आतन्वतीं धमनीं नाड़ीं नो साध्यां असाध्यां वदन्ति॥ ३३॥

असाध्योल्लेखात् सन्निपातादिदोषेषु रोगिष्वन्येषु चासाध्य-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विशीर्णेऽक्षीणतां याति मासान्ते मरणं ध्रुवम्
॥ ३४ ॥
क्षणाद् गच्छन्ति वेगेन शान्ततां लभते क्षणात्।
सप्ताहान्मरणं तस्य यद्यङ्गं शोथवर्जितम् ॥ ३५ ॥

लक्षणमाह। भूलतेति। भूलता किञ्चुलुकस्तदाकारा नाड़ी वहतीति मह्रीलतावत् कृशा तद्गतिवत् मसृणवक्रगमना च, भुजगाकारेति तद्वत्परिपुष्टा तद्गतिवत् बलवद् वक्रगमना च वक्रत्ववैशिष्ट्येन सुस्थदशातो भेदः। विशीर्णे इति देहस्य विशेषणं तेनातिकार्श्येऽपि देहे इत्थम् अनेन प्रकारेण कदाचित्, अक्षीणताम् अनतिकृशतां यदा गच्छति तदा मासान्ते मरणं भवेदित्यर्थः। देहस्य इति देहस्य सम्यक्क्रममपेक्ष्यते, तेन देहोऽपि यदा स्थूलः शोथादिरोगेण, कदाचित् कृशः स्यात् तदा द्वितीये मासि म्रियते इति।

यस्य नाड़ी भूलता भुजगाकारा मह्रीलतावत् कृशा तद्वत् मसृणवक्रगमना तथा भुजगाकारा सर्पवत् परिपुष्टा तद्वद्गमनशीला सती विशीर्णे देहे संक्रमात् अक्षीणतां याति तस्य मासान्ते मरणं ध्रुवम् ॥ ३४ ॥

क्षणादिति। वेगेनेति क्षणात् क्षणात् द्रुतं द्रुतं गच्छति न तु कदाचित् वेगकाले शान्ततामुपलभते। शान्ततास्त्येव क्षणान्तरम्। शोथतन्मात्रसत्त्वेऽपि न चिरमिति सप्ताहमध्ये इति भावः। एवं विशिष्टायां नाड्यां सप्ताहानन्तरं मरणमिति।

क्षणादिति। यस्य नाड़ी क्षणात् क्षणकालं व्याप्य वेगेन गच्छति वहति, क्षणात् सत्वरं शान्ततां निश्चलतां लभते यदि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

हिमवद्विशदा नाड़ी ज्वरदाहेन तापिनाम् ।
त्रिदोषस्पर्शभजतां तदा मृत्युर्दिनत्रयात् ॥ ३६ ॥
निरीक्ष्या दक्षिणे पादे तथा चैषा विशेषतः ।
मुखे नाड़ी वहेन्नित्यं ततस्तु दिनतुर्य्यकम् ॥३७॥
गतिं भ्रमरकस्येव वहेदेकदिनेन तु ।
कन्देन स्पन्दते नित्यं पुनर्लगति चाङ्गुलौ ।

शरीरं शोथवर्जितं स्यात् तस्य सप्ताहात् सप्तदिनानन्तरं अष्टमेऽहनि मरणं भवेत् ॥ ३५ ॥

यदा निरन्तरं ज्वरतापौ शैत्यञ्च नाड्याः । त्रिदोषेति सन्निपातलक्षणसत्त्वे एव भवति ।

हिमवदिति । ज्वरदाहेन ज्वरस्य दाहेन तापिनां ज्वरसन्तापेन सन्तप्तदेहानां त्रिदोषस्पर्शभजतां सन्निपातजुषां हिमवद्विशदा तुषारवत् परुषा शैत्यत्वेन तद्वदनुभूता नाड़ी यदा भवति तदा दिनत्रयात् त्रिद्दिनानन्तरं चतुर्थेऽहनि मृत्युर्भवति ॥ ३६ ॥

दक्षिणे इति पुंसः ; स्त्रियास्तु वाम एव, तथेति करस्थैव । विशेषतो विशेषज्ञानार्थं यदि चोभयनाड्यपि मुखे पुरोभागे नित्यं सदा वहति तदा दिनचतुष्टयं व्याप्य जीवति ।

निरीक्ष्येति । दक्षिणे पादे पुरुषस्य दक्षिणे पादे स्त्रियास्तु वामपादे निरीक्ष्या परीक्षणीया या नाड़ी धमनी विशेषतो विशेषज्ञानार्थं तथा एषा च करस्थापि यदि मुखे तर्जनीनिवेशस्थाने नित्यं सदा वहेत् ततस्तु तदा दिनतुर्य्यकं व्याप्य नरो जीवति । पञ्चमदिने तस्य मृत्युर्भवति । ३७ ॥

भ्रमरस्य परिभ्रमणरूपं गमनमिव मुखे यदि नाड़ी

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मध्ये द्वादशयामानां मृत्युरेव न संशयः ॥ ३८ ॥
स्थित्वा नाड़ी मुखे यस्य विद्युद्योत इवेच्यते।
दिनैकं जीवितं तस्य द्वितीये म्रियते ध्रुवम् ॥३९॥
स्वस्थानविच्युता नाड़ी यदा वहति वा न वा।
ज्वाला च हृदयेऽतीव तदा ज्वालावधिस्थितिः ॥४०

वहति, कियद्दूरं गत्वा पुनस्तत्रागत्य त्यक्तप्रदेशे यथा भ्रमरो भ्रमति तद्वदित्यर्थः। एवं सङ्गतिः। तद्दिने मृत्युरित्यर्थः। दृष्टान्तमाह प्रहरान्तरमिति। कन्देनेति कन्दं मूलं नाड़ीमुखे इति यावत्। तत्र कदाचित् स्पन्दत इति पाठे तत्रैव स्वल्पं स्पन्दत इत्यर्थः। नित्यमिति पाठे तत्र प्रदेशे नित्यं स्पन्दते इत्यर्थः। पुनर्लगति चाङ्गुलाविति अङ्गुलावेव कन्दे मूले पुनर्लगति एवं यदि नाड़ी वहति तदा द्वादशप्रहरमध्ये मृत्युरित्यर्थः।

गतिमिति। भ्रमरकस्य गतिं गमनं तद्वत् नाड़ी चेत् वहेत् तदा एकदिनेन मृत्युर्भवति। यदि नाड़ी कन्दे तर्जनीनिवेशस्थाने नित्यं प्रायेण स्पन्दते पुनरङ्गुलौ तर्जन्यां लगति तदा द्वादशयामानां मध्य निश्चितं ध्रुवं मृत्युर्भवति ॥ ३८ ॥

स्थित्वेत्याद्यस्य स्थित्वा स्थित्वा विद्युत्स्फुरणमिव लक्ष्यते इति। द्वितीय इत्यष्टप्रहरादूर्द्ध्वमित्यर्थः।

स्थित्वेति। यस्य नाड़ी स्थित्वा स्थित्वा मुखे अङ्गुष्ठमूले तर्जनीनिवेशस्थाने विद्युद्योत इव चपलायाः स्फुरणमिव ईक्ष्यते अनुभूयते तस्य जीवितं जीवनं दिनैकं एकदिनं व्याप्य तिष्ठति। स ध्रुवं निश्चितं द्वितीये दिवसे म्रियते ॥३९॥

स्वस्थानं स्वस्य स्थानं एतेन अङ्गुष्ठमूलमिति तस्मात्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अङ्गुष्ठमूलतो वाह्ये द्व्यङ्गुले यदि नाड़िका।
प्रहरार्द्धात् वहिर्मृत्युं जानीयाच्च विचक्षणः ॥४१॥
द्व्यङ्गुलात् वाह्यतो नाड़ी मध्ये रेखा वहिर्यदि।
सार्द्धप्रहरकात् मृत्युर्जायते नात्र संशयः ॥ ४२ ॥

विच्युता सती यदि नाड़ी वहति न वा वहति हृदये यदि ज्वाला विद्यते तदा ज्वालावधि ज्वालापर्य्यन्तं स्थितिस्तदवधिजीवनं ज्ञातव्यमिति।

स्वस्थानमिति। यस्य नाड़ी स्वस्थानविच्युता अङ्गुष्ठमूलात् विच्युता स्खलिता वहति न वा वहति, हृदये वक्षःस्थले अतीव ज्वाला चेत् तदा तस्य ज्वालावधि ज्वालापर्य्यन्तं स्थितिः जीवनस्य सीमेत्यर्थः ॥ ४० ॥

अङ्गुष्ठमूलाद्वहिरङ्गुलिद्वये मध्यमानामिकाया इत्यर्थः। तदा प्रहरार्धाद्वहिर्मृत्युरित्यर्थः।

अङ्गुष्ठमूलत इति। अङ्गुष्ठमूलतः वृद्धाङ्गुलिमूलात् वाह्ये निम्ने द्व्यङ्गुले मध्यमानामिकाया न तु तर्जनीनिवेशस्थाने यदि नाड़िका वहति तदा विचक्षणः पण्डितः प्रहरार्द्धात् वहिः प्रहरानन्तरं मृत्युं जानीयात् ॥ ४१ ॥

द्व्यङ्गुलादिति। द्व्यङ्गुलाद्वाह्यत इति तर्जनीमध्यमयोर्वहिरित्यतोऽनामिकाया मध्ये इति यावत्। रेखाशब्देनात्र नाड़ी ज्ञेया, रेफस्य लकारश्रुतिस्तेन लेखा इत्यर्थः। "श्रेणी लेखास्तु राजय" इत्यमरः। अङ्गुष्ठमूलादारभ्य अनामिकान्ता नाड़ी श्रेणीति शेषः। अनामिकाया मध्ये स्थिता सती नाड़ी रेखा वहिस्तदेति न युज्यते मध्यस्थितत्वेन रेखावहिः स्थितेन च विरोधात् तस्मात् मध्यस्थिते नाड़ी यदा श्रेणी वहिस्तदेवेति भावः। अतोऽङ्गुलित्रयानन्तरं सूचितम्। एव-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मध्ये रेखा समा नाड़ी यदा तिष्ठति निश्चला ।
षड्भिश्च प्रहरैस्तस्य ज्ञेयो मृत्युर्विचक्षणैः ॥४३॥
पादाङ्गुलगता नाड़ी चञ्चला यदि तिष्ठति ।
त्रिभिस्तु दिवसैस्तस्य मृत्युरेव न संशयः ॥ ४४ ॥
पादाङ्गुलगता नाड़ी कोष्णा वेगवती भवेत् ।
चतुर्भिर्दिवसैस्तस्य मृत्युरेव न संशयः ॥ ४५ ॥
पादाङ्गुलगता नाड़ी मन्दमन्दा यदा भवेत् ।
पञ्चभिर्दिवसैस्तस्य मृत्युर्भवति नान्यथा ॥ ४६ ॥

भूता सती यदि नाड़ी वहति तदा सार्द्धप्रहरानन्तरं मृत्युरित्यर्थः ।

द्व्यङ्गुलादिति । द्व्यङ्गुलात् वाह्यतस्तर्जनीमध्यमयोर्वाह्ये अनामिकाया मध्ये नाड़ी यदि वहति तदा सार्द्धप्रहरकात् सार्द्धप्रहरानन्तरं मृत्युर्भवति ॥ ४२ ॥

मध्ये मध्यमा निवेशस्थाने रेखा समेति रेखा नाड़ी समा समानावयवा ऊर्द्धाधोऽनतिक्रम्य तत्रैव यदि निश्चला सती तिष्ठति, निश्चला स्पन्दाभाववती एवं प्रकारेण षड्भिः प्रहरैः षट्प्रहरानन्तरं मृत्युरित्यर्थः ॥ ४३ ॥

पादाङ्गुलगतेति । पादाङ्गुलं पादयुताङ्गुलं, तर्जनीमभिव्याप्य मध्यमायाः पदमेकं तत्र यदि नाड़ी चञ्चला सती वहति तदा त्रिदिनात् वहिर्म्रियत इत्यर्थः ॥ ४४ ॥

पादाङ्गुलगतेति । पादाङ्गुलदेशे नाड़ी यदि कोष्णा ईषदुष्णा वेगवती भवेत् तदा चतुर्भि दिवसै दिनचतुष्टयानन्तरं मृत्युरित्यर्थः ॥ ४५ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एवं संख्यादिभेदेन नाड़ी ज्ञेया विचक्षणैः।
स्वर्गेऽपि दुर्लभा विद्या गोपनीया प्रयत्नतः ॥४७॥
भारप्रवाहमूर्च्छाभयशोकप्रमुखकारणान्नाड़ी।
सम्मूर्च्छितापि गाढ़ं पुनरपि सा जीवितं धत्ते॥४८

पादाङ्गुलगतेति। प्रागुक्तदेशे यदि नाड़ी मन्दमन्दा भवति तदा पञ्चभिर्दिवसैः पञ्चदिनानन्तरं मृत्युरित्यर्थः ॥४६॥

एवमिति। एवं संख्यादिभेदेन पूर्वोक्तसंख्यानुसारेण विचक्षणैः पण्डितै र्नाड़ी ज्ञेया परीक्षणीया, विद्या नाड़ीपरीक्षाविद्या स्वर्गेऽपि दुर्लभा दुर्विज्ञेया प्रयत्नतः गोपनीया ॥ ४७ ॥

भार इति। चिरतरबहुलभारोद्वहनेन वा, प्रवाहेति धारावाहिकरुधिरदर्शनजन्ये या मूर्च्छा तया वा विषवेगेन वेति, भयेति व्याघ्रादिभयेन वा, शोकेति पुत्रदारधनादिविरहेण वा संमूर्च्छितापि अतिनिस्पन्दापि गाढ़ं सुतरां कार्श्यादियोगेऽपीत्यर्थः, पुनरपि साध्यतां यातीत्यर्थः। भावेति पाठे अभिमतकामिन्या अलाभतः। भावानां रत्यादीनां प्रवाहः भावप्रवाह इति न युक्तं, भयशोकयोः पृथग्विधानात् शोके विनष्टो भावशब्द इति। प्रमुखेति अन्यदपि हेत्वन्तरं ज्ञेयं, तदप्यत्र श्रमपतनादि ग्राह्यम्।

भार इति। भारो गुरुत्वं प्रवाहो धारावाहिकरुधिरं तेन मूर्च्छा, भयं व्याघ्रादिदर्शनजन्यत्रासः, शोकः पुत्रस्त्रीधनादिविरहेण दुःखं एते प्रमुखा आदयो यस्य तत् कारणं तस्मात् नाड़ी गाढ़म् अतिमात्रं संमूर्च्छितापि निस्पन्दापि सा नाड़ी पुनरपि जीवितं प्राणान् धत्ते ॥ ४८ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पतितः सन्धितो भेदी नष्टशुक्रश्च यो भवेत् ।
शाम्यते विस्मयस्तस्य न किञ्चित् मृत्युकारणम् ॥४९
तथा भूताभिषङ्गे च त्रिदोषवदुपस्थिता ॥ ५० ॥
समाङ्गा वहते नाड़ी तथा च न क्रमं गता ।
अपमृत्यु र्न रोगाङ्गा नाड़ी तत्सन्निपातवत् ॥५१॥

पतित इति । पतित उच्चात् पतितः, सन्धितः इति अस्थ्यादिभङ्गेन संहितः सङ्गत इति, भेदी अतिसारवान्, नष्टशुक्र इति यक्ष्मादिना अतिरमणेन वा शुक्रक्षयवान्, विस्मयोऽसाध्यत्वानुमानं, शाम्यते नावतरति ।

पतितादिकारणेन यस्य नाड़ी संमूर्च्छिता निस्पन्दा भवति तस्य मृत्युकारणं न स्यादित्यर्थः ॥ ४९ ॥

तथेति । अभिषङ्गोऽभिहननं भूतानामभिषङ्ग इत्यर्थः । भूताभिषङ्गे च देवदुष्टादौ आदिशब्दात् डाकिनीपूतनादीनि च ज्ञेयानि । नाड़ीसन्निपातशालिनी तद्वदुपस्थिता आपातत एव भवति न तु तद्वत् फलप्रदेति अत्र भेदमाह यद्यक्ष्मादिति चिन्तादियोगात् एवं नाड़ी भवति तथापि अपमृत्युर्मृत्यु-रहिता ।

भूताभिषङ्गे यस्य नाड़ी त्रिदोषवत् सन्निपातवत् उपस्थिता तद्गमनशीलेत्यर्थः । तद्वत् फलप्रदा न, तस्य मृत्युभयं नास्ति ॥ ५० ॥

समाङ्गेति । अङ्गेन समा समाङ्गा एतेन अङ्गे श्लिष्टा सती वहतीत्यर्थः । तथा चेति न क्रमं गता व्यतिक्रमं गतेत्यर्थः । वातादीनां गमनक्रमरहिता कदाचित् कुत्र गच्छति, एवम्भूतापि नाड़ी यस्य भवति तस्यापि मृत्युर्नावतरति अपमृत्युरिति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्वस्थानहीने शोके च हिमाक्रान्ते च निर्गदाः।
भवन्ति निश्चला नाड्यो न किञ्चित्तत्र दूषणम् ५२
स्तोकवातकफं दुष्टं पित्तं वहति दारुणम्।
पित्तस्थानं विजानीयाद् भेषजं तस्य कारयेत्॥५३
स्वस्थानच्यवनं यावद् धमन्या नोपजायते।
तत्स्थचिह्नस्य सत्त्वेऽपि नासाध्यमिति हि स्थितिः
॥ ५४ ॥

रिति। अपगतो मृत्युर्यस्या नाड्याः सा तथेति सन्निपातवदपि तर्जन्या न, न स्यात्॥ ५१॥

स्वस्थानहीन इति। उच्चात् पतने अङ्गुष्ठमूलात् च्यवन इति नार्थः। यतो हन्ति च स्थानविच्युतेति वचनात्। निर्गदा इत्यपि च सङ्गतेः, निर्गता अपि निश्चला भवन्ति, तत्र किञ्चिद्दूषणत्वासाध्यानुमानं नोद्भावनीयं, हिमाक्रान्ते इति हिमादिसेवया अङ्गानामतिशीतत्वेऽपि।

अत्युच्चस्थानात् हीने पतने शोके धनबन्धुवियोगजन्यदुःखे, हिमाक्रान्ते हिमादिसेवया अङ्गानाम् अतिशीतलत्वे नाड्यो निर्गदा अपि रोगशून्या अपि निश्चलाः स्पन्दरहिता भवन्ति। तत्र स्वस्थानहीनादिकारणे किञ्चित् कथमपि दूषणं भयकारणं न स्यादित्यर्थः॥ ५२॥

कफवातनाड़ी किञ्चित् वहति क्षीणाधिकत्वात् द्वाभ्यामपि विशेषादुल्बणं, पित्तं विषमवेगेन वहति तदा प्रतीकारार्थं भेषजं कुर्य्यात्, असाध्यता न स्यादिति यावत्॥ ५३॥

स्वस्थानच्यवनमिति। स्वस्थानमङ्गुष्ठमूलं तस्मात् च्यवनं च्युति नाड्या यावत् नोत्पद्यते, तत्स्थस्य सत्त्वे तल्लक्षणस्य विद्यमानतायां सत्यां नासाध्यत्वं ज्ञेयमिति॥ ५४॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यदा यं धातुमाप्नोति तदा नाड़ी तथा गतिः ।
तथाहि सुखसाध्यत्वं नाड़ीज्ञानेन बुध्यते ॥
नाड़ी यथाकालगतिस्त्रयाणां प्रकोपशान्त्यादिभि-
रेव भूयः ॥ ५५ ॥

पुष्टिस्तैलगुड़ाहारे मांसे च लगुड़ाकृतिः ।
क्षीरे च स्तिमितावेगा मधुरे भेकवद् गतिः ॥५६॥
रम्भागुड़वटाहारे रूक्षशुष्कादिभोजने ।

यदेति । यदा यस्मिन् समये यं धातुं रसादिकं समं न दुष्टं प्राप्नोति, तदा वातादयः स्वहेतुभूतोपचिताः सन्तः तथा गतिं कुर्वन्ति अतएव नाड़ी तथागतिर्भवतीत्यर्थः । तथा काल-गतिस्तथाकाले गतिस्तेन यस्य दोषस्य प्रकोपको यः काल-स्तस्मिन् काले, तस्य तादृशी गति र्यस्य दोषस्य यः शान्ति-कालस्तस्मिन् काले तस्य शान्ति र्भूयोभूय इत्यर्थः ॥ ५५ ॥

पुष्टिरिति । पुष्टिः स्थौल्यं तैलाद्याहारे नाड्याः पुष्टि-रित्यर्थः । एतत्तु आहारापक्वशेषस्वरूपं नतु पक्वस्यापक्वस्य सम्बन्धात्, कदाचिदन्यदपि ज्ञेयम् । तैलं इत्युपलक्षणं स्नेह-मात्रशब्दः । एतेषां भक्षणादित्यर्थः । पूर्वोक्तत्वात् गुड़ाहार इति गुड़शब्दोऽत्र बोध्यः किञ्चित् जाड्यत्वात् तैलात् भेदः । मांसा-हारे लगुड़ाकृतिरिति उच्छूनतया दण्डायमानत्वं, क्षीरे क्षीराहारे, स्तिमिता वेगेति स्तिमितं मन्दं मन्दं वेगः प्रवाह-स्तेन मन्दा गतिरित्यर्थः । मधुरे शर्करादौ द्रवे चाद्रवे च भेकवत् प्लवगतिः । ननु प्लवगतिस्तु पित्तप्रकोपात् भवति, मधुरस्तु पित्तोपशमकरस्तदा कथमेवमुक्तमन्यत्र तु यदुक्तं तदप्यसङ्गतम् ॥ ॥ ५६ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वातपित्तार्त्तिरूपेण नाड़ी वहति निष्क्रमम् ॥५७॥
मधुरे बर्हिगमना तिक्ते स्यात् भूलतागतिः।
अम्ले कोष्णा प्लवगतिः कटुके भृङ्गसन्निभा ॥५८॥
कषाये कठिना म्लाना लवणे सरला द्रुता।
एवं द्वित्रिचतुर्योगे नानाधर्मवती धरा ॥५९॥
स्वाद्वम्ललवणा वायुं कषायस्वादुतिक्तकाः।
जयन्ति पित्तं श्लेष्माणं कषायकटुतिक्तकाः ॥६०॥
कट्वम्ललवणाः पित्तं स्वाद्वम्ललवणाः कफम्।

रम्भागुड़योः प्रत्येकं मिलितयोरपि, वटाहारे वटकाहारे रम्भा च गुड़वटकश्चेत्यपरः, रूक्षमस्नेहं चूर्णविदलादि, शुष्कं स्निग्धमपि भर्जनरौद्रादिना कठिनं चिपीटकादि, वातेति वातपित्तगदे यद्रूपं, निष्क्रममिति पौर्वापर्य्यविपर्य्ययेणापि ॥ ५७ ॥

बर्हो मयूरः, भूलता किञ्चुलुकः, प्लवगतिः भेकगमना। भृङ्गः कुलिङ्गविशेषः ॥ ५८ ॥

म्लाना, जड़ा, एवञ्च निर्णीताजीर्णस्यैव वक्तव्यम्। तिक्ते तु कषायत्वम् एवं द्वित्रिचतुःरससंयोगाहारे नानाधर्मशालिनी ज्ञेयेत्यर्थः ॥ ५९ ॥

स्वाद्वम्ललवणा इति। एते वायुं जयन्ति अतो वायुस्थाने नाड़ी वहति, इति एवं सर्वत्र ज्ञेयम्। कफस्थाने इति अर्थात् कषायादयो जायन्ते पित्तनाशका अतस्तत्र न वहति एवं कषायकटुतिक्तकेषु बोध्यम् ॥ ६० ॥

कट्वम्ललवणा रसाः पित्तं कोपयन्ति कोपं प्रापयन्ति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कटुतिक्तकषायाश्च कोपयन्ति समीरणम् ॥६१॥
कटुतिक्तकषायाणां विपाकः प्रायशः कटुः ।
अम्लोऽम्लं पच्यते स्वादु मधुरो लवणस्तथा ॥६२॥
मधुरो लवणोऽम्लश्च स्निग्धभावास्त्रयो रसाः ।
वातमूत्रपुरीषाणां प्रायो मोक्षे सुखा मताः ॥६३॥
कटुतिक्तकषायाश्च रूक्षभावास्त्रयो रसाः ।
दुःखानि मोक्षे दृश्यन्ते वाता विण्मूत्ररेतसाम् ॥६४
मधुरं श्लेष्मलं प्रायो जीर्णात् शालियवाद्दते ।

स्वाद्वम्ललवणा रसाः कफं तथा कटुतिक्तकषाया रसाः समीरणं वायुं कोपयन्ति ॥ ६१ ॥

कटुतिक्तकषायाणामिति कट्वादयो रसा विपाके प्रायशः कट्वः पच्यन्ते, अतः पित्तप्रकोपजं जयन्ति। नाड़ी तस्मात् पित्तस्थानेऽधिकं वहति। अम्लं अम्लपाकी अतः पित्तं कफञ्च द्रवत्वात् जनयति। मधुरो लवणश्च स्वादुः पच्यते अतो वायुं विना मधुरः कफं लवणं पित्तश्लेष्मणी जयतः एवं सर्वत्र ज्ञेयम् ॥ ६२ ॥

मधुर इति। मधुरादित्रयः स्निग्धाः, अतः वातमूत्र-पुरीषाणां मोक्षे त्यागविषये सुखाः सुखकरा मता ज्ञेया इत्यर्थः। मधुरो वातघ्नः पित्तघ्नश्च, एवं लवणश्च स्वादुः पाकः, अतो वातघ्न स्तस्मादेते स्निग्धा मलादीनां मोक्षे सुखदा इति गुरवः ॥ ६३ ॥

कटुतिक्तकषाया इति। एते कट्वादयस्त्रयो रसा रूक्ष-भावा इत्यस्मात् वातमूत्रपुरीषाणां मोक्षे त्यागे दुःखानि दृश्यन्ते ॥ ६४ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मुद्गात् गोधूमतः क्षौद्रात् सिताया जाङ्गलामिषात
प्रायोऽम्लपित्तजननं दाड़िमामलकादृते ॥ ६५ ॥
द्रवेऽतिकठिना नाड़ी कोमला कठिनाशने ।
द्रवद्रवस्य काठिन्ये कोमला कठिनापि च ॥६६॥
अम्लैश्च मधुराम्लैश्च नाड़ी शीता विशेषतः ।
चिपिटै र्भ्रष्टद्रव्यैश्च स्थिरा मन्दतरा भवेत् ।
कूष्माण्डै र्मूलकैश्चैव मन्दमन्दा च नाड़िका ॥६७॥

मधुरमिति । जीर्णात् पुरातनात् शालिधैवात् हैमन्तिकयवात् ऋते विना तथा मुद्गात् गोधूमतः गोधूमात् क्षौद्रात् मधुनः सितायाः शर्करायाः जाङ्गलामिषात् जङ्गलदेशजजन्तुमांसात् ऋते मधुरं मधुरद्रव्यं श्लेष्मलं श्लेष्मकरं ज्ञेयम् । दाडिमामलकात् ऋते प्रायोऽम्लं अम्लद्रव्यं पित्तजननं पित्तकरमिति ॥ ६५ ॥

द्रव इति । द्रवे द्रवसामान्ये नाडी कठिना कठिनस्पर्शा वातपूर्णचर्मपुटकवत्, कठिनाशने कठिनद्रव्यभोजने नाडी कोमला मृदुस्पर्शा भवतीत्यर्थः । द्रवद्रव्यस्य काठिन्ये रौद्रेण जलेन वा द्रवस्यापि काठिन्यमुत्पाद्य यदि भुङ्क्ते तदा नाडी कोमला कठिना च भवति, आदौ कोमला पश्चात् कठिना कर्द्दमान्तर्गतेष्टकादिखण्डवत्, आन्तरी कठिनोपलब्धिरिति गुरवः ॥ ६६ ॥

अम्लैश्चेति । अम्लैरम्लरसैः, एतेन स्निग्धाम्लरसैरिति । विशेषतो नाडी शीता शीतलस्पर्शा, चिपिटैर्भ्रष्टद्रव्यैश्चिपिट भ्रष्टद्रव्ययोः भक्षणे नाड़ी स्थिरा मन्दतया कूष्माण्डै र्मूलकैः कूष्माण्डमूलकयोर्भक्षणैर्मन्दतरा भवति ॥ ६७ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शाकैश्च कदलैश्चैव रक्तपूर्णेव नाड़िका ।
मांसात् स्थिरवहा नाड़ी दुग्धे शीता बलीयसी ६८
गुड़ैः क्षीरैश्च पिष्टैश्च स्थिरा मन्दवहा भवेत् ।
गुड़रम्भामांसरूक्षशुष्कतीक्ष्णादिभोजनात् ।
वातपित्तादिरूपेण नाड़ी वहति निश्चला ॥ ६९ ॥
अम्लेऽपि हृदयमुस्थत्वे भवन्ति तापिताः शिराः ७०

अथ प्रकृतनाड़ीज्ञानमाह ।

प्रातः स्निग्धमयी नाड़ी मध्याह्नेऽप्युष्णतान्विता ।

शाकैरिति । शाकैः शाकसामान्यैः कदलैश्च नाडी रक्तपूर्णेव वहति, अतः कदुष्णा ज्ञेया यथा असृक्पूर्णा भवेत्, मांसात् मांसाहारात् स्थिरवहा दुग्धे दुग्धाहारे शीता शीतस्पर्शा, बलीयसी पुष्टा बलवत्तरा नाडी ज्ञेया ॥ ६८ ॥

गुडैरिति । गुडादिभि र्नाडी स्थिरा सती मन्दं मन्दं वहति, एषां गुडादीनां कफप्रकोपत्वात् गति र्मान्द्यं बोध्यम् गुडरम्भाभ्यां कृतवटकमित्यर्थः । मांसरूक्षशुष्कतीक्ष्णादीनां एकशो वा रूक्षशुष्कमांसेन च, तीक्ष्णं राजिकामरिचादि आदिशब्दात् भृष्टविदाहि द्रव्यमिति । तेषां भोजनात् वातपित्तार्त्तिरूपेण वातपित्तार्त्तिश्च वातपित्तजा पीडा सा किम्भूता "मुहुः सर्पगतिर्नाडी मुहु र्भेकगतिस्तथेति" प्रागुक्तम् । तेन रूपेण प्रकारेण नाडी निश्चला निस्पन्दा सती वहति ॥ ६९ ॥

अम्लेऽपीति । असुस्थत्वे हृदि सति अम्ले अम्लरसभोजने शिरा नाड्यस्तापिता उष्णा भवन्तीत्यर्थः ॥ ७० ॥

प्रातरिति । कफकालत्वात् प्रातर्दशदण्डपर्यन्तं नाड़ी

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सायाह्ने धावमाना च रात्रौ वेगविवर्जिता ॥
प्रकृतिस्था च सा नाड़ी सदा ज्ञेया भिषग्वरैः ७१
अङ्गग्रहणे नाड़ीनां जायन्ते मन्थरा प्लवाः ।
प्लवः प्रबलतां याति ज्वरदाहाभिभूतये ॥ ७२ ॥
सान्निपातिकरूपेण भवन्ति सर्ववेदनाः ॥ ७३ ॥
ज्वरप्रकोपे धमनी सोष्णा वेगवती भवेत् ॥७४॥

स्निग्धा एवं मध्याह्ने उष्णतान्विता पित्तकालत्वात् पित्तोल्बण-सन्तापयुक्ता, एवं सायाह्ने वातकोपात् धावमाना रात्रौ वेगवर्जिता मन्दगमना तुषारपतनात् कफस्य प्राधान्यादिति, एवम्भूता नाड़ी प्रकृतिस्था स्वभावधर्मशालिनीत्यर्थः ॥ ७१ ॥

प्लवो भेकस्तद्वद्गमनं तेन चिरविलम्बेन अनुद्विक्ततया बहुवचनादेवमेव वारद्वियं सामान्याङ्गग्रहपिशुनमिदं भविष्य-ज्वरदाहपिशुनस्तु तद्विपरीतबहुलप्लव इत्याह प्लवः प्रबलता-मिति। उद्भटतया तथैव धारावाहिरूपतां याति नाड़ी-त्यर्थः ।

अङ्गग्रहणेति। अङ्गग्रहणे अङ्गवेदनया नाड़ीनां प्लवा द्वित्रिवारं मन्थरा भवन्ति नाड्या भेकादिवत् उत्प्लुत्य उत्प्लुत्य मन्दतया गमनमनुभूयते इत्यर्थः। ज्वरदाहाभिभूतये प्लवः नाड्या भेकादिवत् गमनं प्रबलतामाधिक्यं धारावाहिरूपं याति प्राप्नोति ७२ ॥

सान्निपातिकरूपेणेति। सान्निपातिकरूपवहनेन ज्वर-रूपपरिज्ञानेऽपि सर्ववेदनापरिज्ञानं सर्वेति नानावेदनाः पर्वणि पर्वणि भवन्तीत्यर्थः ॥ ७३ ॥

ज्वरप्रकोप इति। ज्वरप्रकोपे धमनी नाड़ी सोष्णा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ज्वरे च वक्रं धावन्ति तथा च मारुतप्लवे ।
रमणान्ते निशि प्रातस्तप्ता दीपशिखा यथा ॥७५॥
भृता च सरला दीर्घा शीघ्रा पित्तज्वरे भवेत् ।
शीघ्रमाहननं नाड्याः काठिन्याच्च चला तथा ।
मलाजीर्णेन नितरां स्पन्दनञ्च प्रकीर्त्तितम् ॥७६॥

उष्णेन सह वर्त्तमाना, वेगवती द्रुतगमना भवेदित्यर्थः ॥ ७४ ॥

ज्वरे चेति । वक्रमिति सर्पादिगमनं वक्रं यथा स्यात्तथा इति क्रियाविशेषणं धावन्ती शीघ्रगमना ज्वर इत्यधिकारात् उष्णानुभवात् वाताद्भेदः । वाते तु नाड्या अतिशयवक्रता आन्तरीयकौष्णता नास्त्येव। रमणानन्तरमपि रात्रावपि प्रात-रपीति नार्थः । प्रातः स्निग्धमयीति विरोधात् ज्वरावच्छेदेनैव समस्तान्वय इत्येके । तस्य च वातादिजन्यत्वसामान्यं तावत् उक्तलिङ्गैरेवावगन्तव्यम् ।

ज्वरे ज्वरवेगे नाड्यः वक्रं सर्पादिगमनवत् धावन्ति शीघ्र-गमना भवन्ति इत्यर्थः । मारुतप्लवे वातोद्रेकेऽपि तथा पूर्व-वत् धावन्ति । रमणान्ते निशि रात्रिकालीनरमणान्तरं, प्रातरिति रात्रिकालीनरमणान्ते प्रातःकाले नाड़ी दीपशिखा इव तप्ता भवति ॥ ७५ ॥

भृतेति । भृता परिपूर्णा सरला परितो ग्रन्थिजाड्यादि-रहिता, दीर्घा अङ्गुलीत्रयस्थानव्यापिनी, शीघ्रा वेगवतीति पित्तसञ्चयदशायाम् । प्रकोपे तु भित्त्वेव वहिरूर्द्ध्वं स्फुरतीव, अत्र हेतुः काठिन्यादिति । मलाजीर्णेन तत्रैव पित्तज्वरे दोषा-जीर्णसम्बन्धेन नितरां सुतरां तथा चापल्येन च सहजया स्पन्दनं परिकीर्त्तितम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नाड़ी तन्तुसमा मन्दा शीतला श्लेष्मकोपतः॥७७॥
चञ्चला तरला स्थूला कठिना वातपित्तजा ।
ईषच्च दृश्यते तूष्णा मन्दा स्यात् श्लेष्मवातजा॥७८
निरन्तरं खरं रूक्षं मन्दश्लेष्मातिवातला ।
रूक्षवातभवे तस्य नाड़ी स्यात् पिण्डसन्निभा ।
सूक्ष्मा शीता स्थिरा नाड़ी पित्तश्लेष्मसमुद्भवा॥७९

भृतेति । पित्तज्वरे पित्तजन्यज्वरे नाड़ी भृता परिपूर्णा सरला परितो ग्रन्थिजाड्यादिरहिता, दीर्घा तर्जनीमध्यमा-नामिकाङ्गुलीत्रयस्थानव्यापिनी सती शीघ्रा पित्तसञ्चय-दशायां वेगवती भवेत्, काठिन्यात् पित्तप्रकोपकाले इति शेषः । शीघ्रमाहननं नाड्याः द्रुतम् आहननं कृत्वा चला वहति ॥ ७६ ॥

तन्तुसमा अतिसूक्ष्मा मन्देति मरालादिवत् मन्थरागमना शीतलेति तप्तोदकसिक्तरज्जुवत्. ज्वरसम्बन्धात्, कफचय-प्रकोपरूपश्च उक्तम् ॥ ७७ ॥

चञ्चलेति । चञ्चला कपिवदस्थिरा कलिङ्गभेकगमना चेति वातधर्मः । ईषच्च दृश्यते इति ईषदुष्णा नाड़ीत्यर्थः । वातधर्मोऽयं, मन्दा स्यादिति मन्दगमना हंसगमा चेति कफ-धर्मोऽयम् ॥ ७८ ॥

निरन्तरमिति । निरन्तरं धारावाहिरूपं मध्ये गत्यन्तर-रहितं, खरमिति मान्द्यव्यतिरेकेण धारावाहि, रूक्षमर्था-दस्निग्धभावं कर्कशस्पर्शरूपञ्च मन्दश्लेषेति वाताधिक्यमपेक्ष्य श्लेष्मविनिर्मुक्तवातमाह रूक्षेति, पिण्डसन्निभेति वात्यादिना मध्ये वर्त्तुलीकृतप्राया चक्राकारेत्यर्थः, सा च अतिवक्रताति-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सौम्या सूक्ष्मा स्थिरा मन्दा नाड़ी सहजवातजा।
स्थूला च कठिना शीघ्रा स्पन्दते तीव्रमारुते॥८०॥
ज्वरप्रकोपे धमनी सोष्णा वेगयुता भवेत्।
कामात् क्रोधात् वेगरोधात् क्षीणा चिन्ताभव-
प्लुतात् ॥८१॥
मध्ये करे वह्निर्नाड़ी यदि सन्तापिता ध्रुवम्।
तदा नूनं मनुष्याणां रुधिरापूरिता मला: ॥८२॥

स्थूलताभ्यां ज्ञेया। सूक्ष्मा कृशा स्थूलताविपर्य्ययेण कार्श्यस्यापि कफकार्य्यत्वात्, शीता शीतला अथ कदाचिदल्पशीता, कटुष्णा चेति केवलकफात् भेदः। तथा स्थिरा विश्रान्तवेगा, पित्तश्लेष्मजा नाड़ीत्यर्थः ॥ ७९ ॥

सौम्येति। सौम्या अकठिना सूक्ष्मा कृशा स्थिरा चिरादेवोपलभ्यमानस्पन्दा, मन्दा उपलभ्यमानस्पन्दत्वेऽपि अनुत्कटस्पन्दा अप्रखरगमनेत्यर्थः। स्थूला अकृशा कठिना लौहादिवत्स्पर्शा, शीघ्रा अविलम्बेन स्फुरतीत्यर्थः ॥ ८० ॥

ज्वरप्रकोपे चेति स्पष्टम्। कामादिति कामक्रोधवेगरोधचिन्तादिषु नाडी क्षीणा अतिसूक्ष्मा भवति। ज्वरस्यापि विद्यमानत्वे चाञ्चल्यरहितत्वं सूक्ष्मत्वात् ॥ ८१ ॥

मध्यमे करे परीक्षार्थं निक्षिप्तमध्यमाङ्गुलिमूल एव यदि पित्तोद्रेकेण सन्तापिता तदा दुष्टरुधिरपूर्णता ज्ञेया। कफोणिस्थले नाड्या इति केचित् सर्वमेतत् ज्वरादन्यत्रापि बोद्धव्यम्। मला इत्यनेन उष्णवातसम्बन्धेन वातरक्तपरिचायकमिति वा। कफ दुष्टवातसम्बन्धेन वातरक्तपरिचायकं वा। प्रकरणन्तु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ज्वरस्य सहजागन्तुजभेदेन द्विधा,
सहजमुक्त्वाऽधुना आगन्तुजमाह।

भूतज्वरे सेक इवाति वेगा,
धावन्ति नाड्यो हि यथाब्धिगामाः ॥८३॥
ऐकाहिकेन क्वचन प्रदूरे,
चणान्तगामा विषमज्वरेण।
द्वितीयके वाथ तृतीयतुर्य्ये,
गच्छन्ति तप्ता भ्रमिवत् क्रमेण ॥ ८४ ॥

ज्वरहेतुकतया इति। त्रिदोषमात्रे उल्वणानुल्वणभेदादिदं सर्वमिति केचित्।

मध्ये इति। मध्ये करे परीक्षार्थं निक्षिप्तमध्यमाङ्गुलिमूले नाडी यदि ध्रुवं पित्तोद्रेकेण सन्तापिता उष्णस्पर्शा सती वहेत् तदा नूनं निश्चितं मनुष्याणां मला वातादिदोषा रुधिरेण दुष्टेन रक्तेन आपूरिता सम्यक् पूरिता ज्ञेयाः ॥ ८२ ॥

सेके जलसेके स्रोतःस्वतीव जलप्लुतेवेति यावत् तापस्तु स्यादेव। तेन तप्तजलसिक्तरज्जुवत् इत्यर्थः। यथा अब्धिगामा नद्यः पयःपूरे प्रविशन्तीत्यन्वयः ॥ ८३ ॥

प्रदूरे इत्यर्थादङ्गुष्ठमूलतः कियद्दूरे, चणावसानमात्रेण गमनशीला नाड्य इत्यनुषज्यते। द्वितीयकादौ च क्रमेण किञ्चित् किञ्चित् दूरं गच्छन्तीत्यर्थः। न चैव स्वस्थानच्यवनेनासाध्यत्वमिति अत आह तप्ता इति विशेषणेनान्वयः। भ्रमिवदिति पुनरेवमेवेति।

ऐकाहिकेनेति। ऐकाहिकेन विषमज्वरेण क्वचन कुत्रचित् प्रदूरे अङ्गुष्ठमूलात् किञ्चिद्दूरे नाड्यः गच्छन्ति, चणान्त-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क्रोधजे सङ्गलग्नाङ्गा ससङ्गा कामजज्वरे ।
उष्णावेगधरा नाड़ी ज्वरकोपे प्रजायते ॥ ८५ ॥
उद्वेगक्रोधकालेषु भयचिन्ताभ्रमेषु च ।
भवेत् क्षीणगतिर्नाडी ज्ञातव्या वैद्यसत्तमैः ॥८६॥
कामात् क्रोधात् वेगवती क्षीणा चिन्ताभार-
प्लुतात् ।

गामाः क्षणकालान्तरं पुनः स्वस्थानं गच्छन्ति । द्वितीयके तृतीयके तुर्य्येऽथवा चातुर्थके वा ज्वरे नाड्यः तप्तास्तप्तस्पर्शाः सत्यो भ्रमिवत् क्रमेण कियद्दूरे गच्छन्ति ॥ ८४ ॥

सङ्गेति क्वचित् किञ्चित् आवर्जितदेहा, समेति नाड्यन्तरालिङ्गितप्राया, ज्वर इति ज्वररूपोष्णतावश्यकतया, सङ्गलग्नं नाड्यन्तरस्पृष्टमिव अङ्गं यस्याः सा नाडीति प्रकरणात्, ससाङ्गेति नाड्यन्तरसम्बन्धेनैव वातादिक्रम इति, नतु उल्बणा । अजीर्णे जाड्यमात्रं न तु नाड्यन्तरसम्बन्धं उपैति असम्भवत्वात् इति । वेगधरा इति, वेगः शीघ्रगमनभेदः ।

क्रोधज इति । क्रोधजे ज्वरे नाडी सङ्गलग्नाङ्गा अन्यनाड्या सह संलग्ना अन्यनाड्युपरि इव नाडी स्थिता इत्यर्थः । कामजज्वरे नाडी ससङ्गा अन्यनाड्या सह आलिङ्गिता इव, ज्वरकोपे पूर्वोक्तज्वरद्वयस्य प्रकोपे नाडी उष्णा उष्णस्पर्शा वेगधरा वेगवती च भवति द्रुतगमनेत्यर्थः ॥ ८५ ॥

असमशीघ्रगमनादिभेदेन उद्वेग उत्पद्यते । क्रोधः ख्यातः कामो रतिः भयं राक्षसादिदर्शनात् चिन्तायां दुःखादेर्भावनायां भ्रमे भ्रमादिषु ॥ ८६ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ज्वरे च रमणे नाड़ी क्षीणाङ्गी मन्दगामिनी ॥८७॥
ज्वरे कामार्त्तिरूपेण भवन्ति विकलाः शिराः।
उष्णत्वं विषमा वेगा ज्वरिणां दधिभोजनात्।
काञ्जिकया ज्वराक्रान्ते जायन्ते मन्थरा गतिः ॥८८॥
व्यायामे भ्रमणे चैव चिन्तायां धनशोकतः।
नानाप्रकारगमनं शिरा गच्छति विज्वरे ॥८९॥

कामादिति। कामात् रत्यावेशात्, क्रोधात् अमर्षात् वेगवती नाडीत्यर्थः। चिन्ताभरप्लुतात् चिन्तातिशययोगात् क्षीणा नाडीति शेषः। ज्वरे इति ज्वरे सत्यपि रमणे कृते क्षीणाङ्गी कृशा सती मन्दं मन्दं वहतीत्यर्थः न तु ज्वरे च रमणे च इति ॥ ८७ ॥

ज्वरे कामार्त्तिरूपेणेति। कामार्त्तिः रत्यावेशपीडा तदवस्थासु दृष्टा प्राप्ता नाड़ी विकला इतस्ततश्चञ्चला उष्णत्वमिति, सहजज्वरादधिकं, विषमा ज्वरोक्तादपि उत्कटेति ज्वरं विना दधिभोजनाच्चेत्यर्थः। ज्वरे अन्यरोगे च काञ्जिकभोजनात् मन्थरा गतिः द्रव्यस्वभावादिति।

ज्वरे कामार्त्तिरूपेण ज्वरकालीनस्त्रीसंसर्गेच्छया शिरा नाद्यः विकला इतस्ततश्चपलाः, ज्वरिणां दधिभोजनात् ज्वरे दधिभोजनात् उष्णत्वं नाद्य इति शेषः। विषमा वेगा ज्वरादधिकवेगा, काञ्जिकया ज्वराक्रान्ते मन्थरा गति र्नाद्य इति शेषः ॥ ८८ ॥

चिन्तायां अध्ययनादिना। नानेति क्षणं क्षणं अन्यरूपतया। विज्वर इति ज्वरमुक्तमात्रे, प्रकृतशरीरेऽपि व्यायामादिना नाड़ीज्ञानभावस्य उक्तत्वात्। इति ज्वरज्ञानं ॥८९॥

 Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इदानीं प्राप्तावसरतया योगान्तर निरूपणे कर्त्तव्ये, प्रकटरोगाणां ग्रन्थान्तरे निःसन्देहनिरूपणात् तेषां वातादिजन्यत्वविशेषस्य प्रागुक्तलक्षणैरेवाधिगमनाच्च निगूढ़लिङ्गरोगनिरूपणमेवारभमाणो निखिलगदमूलत्वात् अजीर्णनिरूपणमाह।

अजीर्णे तु भवेन्नाड़ी कठिना परितो जड़ा।
प्रसन्ना तु द्रुता शुद्धा त्वरिता च प्रवर्त्तते॥ ९०॥

अत्र विशेषमाह।

पक्वाजीर्णे पुष्टिहीना मन्दं मन्दं वहेत् शिरा।
असृक्पूर्णा भवेत् कोष्णा गुर्वी सामा गरीयसी ९१

प्रसङ्गात् भोजनक्षुधयो र्ज्ञानमाह।

सुखितस्य स्थिरा ज्ञेया चपला क्षुधितस्य च।

अजीर्णे आमपक्वादिसामान्ये कठिना अकोमला परितः उभयपार्श्वतः। जड़ा अपृथग्भूतप्राया, वक्ष्यमाणत्वरितत्वव्यतिरेकेण मन्दमन्दगमना च। प्रसन्ना तु अजीर्णाभाववती द्रुता अकठिना जलप्लुतेव च, शुद्धा जाड्यरहिता, त्वरिता शीघ्रस्पन्दा च॥ ९०॥

कोष्णेति मध्यकर एव प्रागुक्तं, गुर्वी कोष्णेति पूर्वेणान्वयः। उक्तञ्च "गुर्वी कोष्णा च रुधिरपूर्णा नाड़ी प्रजायते" इति। सामा चेत् गरीयसी, स्थूला गुरुतायुक्तत्वात् आमस्य, अकठिना कफोद्रेकात्, वाताजीर्णे तु कठिनेत्यनुभवः॥ ९१॥

सुखितस्येति। सुखितस्य भोजनादिना तृप्तस्य भोजनापक्वरससम्बन्धात् स्थिरा मन्दगमना नाड़ीतिशेषः। स्थूलता

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मन्दाग्नौ क्षीणधातौ च नाड़ी मन्दतरा भवेत् ९२

अन्यच्च ।

मन्देऽग्नौ क्षीणतां याति नाड़ी हंसाकृतिस्तथा ९३

आमाशये पुष्टिविवर्द्धनेन,
भवन्ति नाड्यो भुजगाग्रवृत्ताः ।
आहारमान्द्यात् उपवासतो वाऽ-
तथैव नाड्यो भुजगातिवृत्ताः ॥ ९४ ॥

चेत्तत्र मन्तव्या अन्यत्र च "सुखितस्य स्थिरा ज्ञेया तथा बलवती मते"ति पाठे बलवती स्थूला, चपला अस्थिरा पित्तोल्वणतया कुलिङ्गलावकादिगमना च। मन्दाग्नेरिति मन्दतरा हंसगमना क्षीणा शीतला चेति। तथा च क्षीणधातौ च मन्दाग्नौ नाड़ी मन्दतरा भवेदिति। अस्यार्थः, अत्र किञ्चिज्जड़ता बोद्धव्या दीप्ताग्नौ लघुताविपर्य्ययात् ॥ ९२ ॥

मन्द इति। हंसाकृतिः हंसगमनेत्यर्थः ॥ ९३ ॥

भुजगाग्रवृत्ता इति। स्थौल्याभिवृद्धाः पश्चादपेक्षया भुजगस्य अग्रभुजे भुजगाग्रे वृत्तं वर्त्तनं यासाम्। अतिवृद्धा इति क्वापि। तथा बहुभोजिनोऽल्पाशनेन च ईषद्धि कराग्र एव सर्पफणाकारा भवन्ति. किञ्चित् वक्रा भूत्वा स्थित्वा वहन्तीत्यर्थः। भुजगप्रमाणा इत्यपि पठन्ति केचित्। अतथा अन्यथा तेन क्रमेण पुष्टाः क्रमेण क्षीणाश्चेत्यर्थः। अतिवृत्ताः वर्त्तुलास्तेन गतिस्तु मन्दैव। उपवासे तु शीघ्रक्षीणा च वक्रा च वाताधिक्यात्।

आमाशय इति। आमाशये प्रवाहिकायां पुष्टिविवर्द्धनेन पुष्टिकरद्रव्यभोजनेन नाड्यो भुजगाग्रवृत्ता भुजगस्य सर्पस्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लघ्वी वहति दीप्ताग्नेस्तथा वेगवती स्मृता ॥९५॥
पादे च हंसगमना करे मण्डूकसंप्लवा।
तस्याग्ने मन्दता देहे त्वथवा ग्रहणीगदः ॥ ९६ ॥

भेदेन शान्ता ग्रहणीगदेन,
निर्वीर्य्यरूपा त्वतिसारभेदे।
विलम्बिकायां प्लवगा कदाचित्,
आमातिसारे पृथुला जड़ा च ॥ ९७ ॥

अग्रभाव इव वृत्तं वर्त्तुलाकारं यासां सर्पफणाकारवत् वर्त्तुला इत्यर्थः। आहारमान्द्यात् आहारस्य अल्पत्वात्, वा उपवासतः अनाहारात् नाड्यो भुजगातिवृत्ताः सर्पवत्गमनशीलास्तद्वत्तुंलाकाराश्च भवन्ति ॥ ९४ ॥

लघ्वी न पुष्टा नापि क्षीणा, किन्तु स्वच्छा उच्छूना च, तथा क्षुधावृद्धग्रा वेगवती धावमाना, मन्दाग्नेवैपरीत्येन च च अशीतला क्षीणा च ज्ञेया ॥ ९५ ॥

पादस्था करस्था च नाड़ीत्यर्थः।

पाद इति। पादे यस्य पादस्थिता नाड़ी हंसगमना हंसवद्गमनशीला, करे हस्तस्थितनाड़ी मण्डूकसंप्लवा भेकवद्गमना भवति तस्य देहे शरीरे अग्ने मन्दता अग्निमान्द्यं अथवा ग्रहणीगदः ग्रहणीरोगः ज्ञेयः ॥ ९६ ॥

संग्रहग्रहण्यामिव यदि रेचनं महत् तदानीं शान्ता अनुल्वणा कदाचित् किञ्चिदेवोपलभ्यमानस्पन्दा। एवञ्च चिरातिसारिणो यदि भेदो रेचनं तदानीं तत्र कृच्छ्रतमा, अतिसारमात्रे कृच्छ्रतमत्वमतिरेचनात्। निर्वीर्य्यरूपा स्रस्ताङ्गवत् हस्तपादस्वेदादिना उपलभ्यमानस्पन्दत्वेऽपि अतिमृदु-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

निरोधे मूत्रशकृतो विड्ग्रहे त्वितराश्रिता: ।
विसूचिकाभिभूते च भवन्ति भेकवत्क्रमा: ९८॥
आनाहे मूत्रकृच्छ्रे च भवेन्नाड़ीगरिष्ठता ॥ ९९ ॥

वातेन शूलेन मरुत्प्लवेन,
सदातिवक्रा हि शिरा वहन्ती ।
ज्वालामयी पित्तविचेष्टितेन,
साध्मानशूलेन च पुष्टिरूपा ॥ १०० ॥

स्पन्दा । कदाचिदिति प्रायश: शान्ता । इति ग्रहणी संग्रहणीविलम्बिकातिसारज्ञानम् ।

भेदेनेति । ग्रहणीगदेन संग्रहग्रहण्या भेदेन महता रेचनेन नाड़ी शान्ता अनुल्वणा वेगरहितेत्यर्थ: । अतिसारभेदे चिरातिसारिणो रेचने निर्वीर्य्यरूपा मृदुस्पर्शा, विलम्बिकायां प्लवगा भेकवद्गमना, आमातिसारे पृथुला पुष्टा जड़ा च भवति ॥ ९७ ॥

मूत्रशकृतोर्मिलितयो: विड्ग्रहे इत्येकैकश: । स्वत: स्वेच्छया निरोधे धारणे वा, इतराश्रिता एकतराश्रिता इति मिलितापेक्षया न्यूनता क्रमस्य विसूचिकेति विसूचिकाश्मरीमूत्रकृच्छ्रज्वरादिजन्यविष्टम्भादिपरं तेन वक्रता च "विष्टम्भगुल्मेन च वक्ररूपा" इति वक्ष्यमाणत्वात् । सूक्ष्मता च । यथा चान्यत्र "विसूच्यां दृश्यते नैव नैव स्थानं विमुञ्चति" इति कदाचित् स्पन्दानुभवोऽपि । अवान्तरभेदास्तूपदेशानुभवादिना ज्ञेया: । इति मूत्रवर्चोग्रहविसूचिकाज्ञानम् ॥ ९८ ॥

गरिष्ठता गुरुता काठिन्यञ्चेति ॥ ९९ ॥

वातशूलहेतो: शिरा वातप्लवेन वातोल्वणगत्या सर्वदैवा-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रमेहे ग्रन्थिरूपा सा प्रतप्ता त्वामदूषणे ॥ १०१ ॥

उत्पित्सुरूपा विषविष्टिकाले,
विष्टम्भगुल्मेन च वक्ररूपा ।
अत्यर्थवातेन अधः स्फुरन्ती
उत्तानभेदिन्यसमाप्तिकाले ॥ १०२ ॥

तिवक्रगत्या वहन्ती, तथा च पित्तशूलेन ज्वालामयी भवति । उभयशूलेन उभयधर्मवती भूत्वा पुष्टिरूपा भवतीति निर्गलितार्थः । उभयधर्मविरहेण तु आमशूलं क्रिमिशूलमेव वा ।

वातेनेति । वातशूलहेतो र्मरुत्प्लवेन वातोल्वणगत्या सततं वक्रा वहन्ती नाड़ीति शेषः । पित्तशूलेनेति उभयधर्मवती भूत्वा पुष्टिरूपा भवतीत्यर्थः । ज्वालामयीति अत्युष्णा पित्तस्य विदाहित्वेन अत उभयधर्मवती वक्रा उष्णा च । शूलस्य सर्वस्य वातारम्भकत्वात् सर्वेषु शूलेषु नाड़ी वक्रगमना उष्णता तु केवलपित्तस्य रूपमिति । अतः पित्तमेव उभयधर्मविरहेण आमशूलमेव तद्वशीभूतया ज्ञेयम् ॥ १०० ॥

प्रमेहे ग्रन्थिरूपा मध्ये मध्ये ग्रन्थिमतीव भवति । तथैव आमदोषे कदुष्णा च ॥ १०१ ॥

विषभक्षणेन, सर्पादिदंशनेन वा या विष्टिस्तस्यां नाड़ी उत्पित्सुरिव अपरिनिष्ठगमना स्यात् । विष्टम्भगुल्मे च उत्पित्सुरपि वक्रा । तथापि वाताधिकतया अधस्तात् स्फुरन्ती तिर्य्यग्भेदिनी भवति, तत्रापि तदसम्पूर्णदशायां उत्तानभेदिन्यपि भवति, लतावदूर्द्ध्वं प्लवेन गच्छत्यपि यद्वा असमाप्तिकाले अन्तरान्तराधस्तात् ऊर्द्ध्वमपि यातीत्यर्थः ।

उत्पित्सुरूपेति । विषविष्टिकाले विषभक्षणे अथवा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

गुल्मविशेषमाह।

गुल्मेन कम्पोऽथ पराक्रमेण,
पारावतस्येव गतिं करोति ॥ १०३ ॥
व्रणेऽतिकठिने देहे प्रयाति पैत्तिकं क्रमम्।
भगन्दरानुरूपेण नाड़ीव्रणनिवेदने ॥
प्रयाति वातिकं रूपं नाड़ीपावकरूपिणी ॥ १०४॥

सर्पादिदंशने शरीरे विषस्य या विष्टिर्व्यापनं तत्काले व्यापनावस्थायां नाड़ी उत्पित्सुरूपा अपरिनिष्ठगमना अस्थिरेत्यर्थः। विष्टम्भगुल्मेन विष्टम्भगुल्मरोगे च नाड़ी उत्पित्सुरूपा अतिवक्ररूपा वक्रगमना। अत्यर्थवातेन वाताधिक्येन अधः स्फुरन्ती अधस्तात् स्फुरन्ती चाञ्चल्येन चलन्तीत्यर्थः। असमाप्तिकाले असम्पूर्णावस्थायां पूर्वरूपे इत्यर्थः। उत्तानभेदिनी लतावदूर्द्ध्वं प्लवेन गच्छति अन्तरा अन्तरा अधस्तात् ऊर्द्ध्वमपि यातीत्यर्थः ॥ १०२ ॥

कम्पश्चञ्चलता पारावतगतिर्भ्रमिवत् घूर्णमाणा उन्मादादावप्येवमेव क्रमः।

गुल्मेनेति। गुल्मेन गुल्मरोगेण कम्पः नाड्याश्चञ्चलता अथ अनन्तरं पराक्रमेण अतिशयेन पारावतस्य कपोतस्य एव गतिं करोति गुल्म इति शेषः। उन्मादरोगेऽपि तद्रूपगतिं करोति ॥ १०३ ॥

व्रणे सति लावकादिगतिं प्रयाति, कठिने देहे इति अपक्वदशायां, पक्वदशायान्तु न तथेत्यर्थः। भगन्दरेति भगन्दरे नाड़ीव्रणे च वातिकक्रमं भुजगादिगतिवत् वक्रा प्रयाति पावकरूपिणीति सदैव नाड़ी उष्णेत्यर्थः ॥ १०४ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वान्तस्य शैल्याभिहतस्य जन्तो-
र्वेगावरोधाकुलितस्य भूयः ।
गतिं विधत्ते धमनी गजेन्द्र-
मरालमालेव कफोल्वणेन ॥ १०५ ॥

कफेति। वान्ताद्यवस्थानन्तरमपि कदाचित् तथात्वात्। तेन छर्द्दिप्रसङ्गात् पवनोऽपि अवश्यं धातुक्षयवृद्धिं उपैति इत्यादिना न विरोधः। तस्य धातुक्षयादिव्यापारे सापेक्षत्वात्, कफोल्वणेन यथा तथा इत्यर्थः। तेन स्पन्दा मन्दा च। तथा भुक्तस्य वान्तस्य च मेदुरस्य इत्यादि रामराजः।

वान्तस्येति वमितस्य जनस्य शैल्याभिहतस्य च शैल्यशब्देन शस्त्रलोष्टलगुड़ादयः, एतैरपि हतस्य क्षुण्णस्य इत्यर्थः। वेगावरोधादिति वेगो मलादीनां यथाकालं प्राप्तानां मलमूत्रादीनां अवरोधेन धारणेन आकुलितस्य पीड़ितस्य नाड़ी गजवरगमनवत् मन्थरा मरालो हंसस्तद्‌गतिरिव मन्दगमना च भवतीत्यर्थः। कफोल्वणेनेति एतयोरिव गते र्मान्द्येनान्वयस्तेन स्तिमितमन्दगमना परिपुष्टा चेत्यर्थः। अथवा कफोल्वणेनेति वमनादिना हृदयरूपश्वासत्यागेन उच्छलितकफेन गतं नाड्या मान्द्यमितिशेषः, एवं स्त्रीरोगादिकमपि रक्तपित्तादिदृष्टिज्ञानं क्रमतो ज्ञातव्यं अस्तकपूर्णा भवेत् कोर्णेति वचनात् ॥ १०५ ॥

इति नाड़ीविज्ञानव्याख्या समाप्ता।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri
सोहनलालशर्मा·जगाधरीवाले

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



पण्डितकुलपतिः

श्रीजीवानन्दविद्यासागर वि, ए

PANDIT KULAPATI JIBANANDA VIDYASAGARA, B. A.

Superintendent, Free Sanskrit College, Calcutta.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh